# दीपिका

## अष्टमकक्षायै
## संस्कृत–अभ्यासपुस्तिका

8




राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् दिल्ली
DELHI
SCERT
स्वाध्यायान्मा प्रमदः

राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्
वरुण मार्ग, डिफेन्स कॉलोनी, नई दिल्ली–110024

**ISBN:** 978-93-6291-274-9
©State Council of Educational Research and Training, Delhi.
2025
Copies : 895

# अभ्यासपुस्तिकानिर्माणसमितिः

## संरक्षकः

**श्री पांडुरंग के पॉलः (आई.ए.एस.)**
प्रमुखः सचिवः (शिक्षा) अध्यक्षः, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ. रीता शर्मा**
निदेशिका, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

## परामर्शदाता

**डॉ. मुकेश यादवः**
सचिवः, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली
परियोजना समन्वयिका

**डॉ. मनीषा तनेजा**
सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

## विशेषज्ञाः

**प्रो. जतीन्द्र-मोहन-मिश्रा**
आचार्यः, संस्कृतम्, भाषा-शिक्षा-विभागः, राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**प्रो. लीना सक्करवालः**
आचार्या, शिक्षा-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जनकपुरी, दिल्ली

**प्रो. कमला भारद्वाजः**
पूर्व-विभागध्यक्षा, श्रीलालबहादुर-शास्त्री-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, दिल्ली

**डॉ ज्ञानेन्द्र-कुमारः**
सहायक-आचार्यः, केन्द्रीय-शिक्षा-संस्थान, दिल्ली-विश्वविद्यालयः

**Published by**: State Council of Educational Research and Training, Delhi- 110024.
**मुद्रकः ऐजुकेशनल स्टोर्स, गाजियाबाद-201009 (उ.प्र.)**

**डॉ वाचस्पतिनाथझामणि**
सहायक-आचार्यः, संस्कृतम्, भाषा-शिक्षा-विभागः, राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ. मनीषा तनेजा**
सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ आभा झा**
प्रवक्त्री-संस्कृतम्, गार्गी-सर्वोदय-कन्या-विद्यालयः, ग्रीन पार्कः, दिल्ली -16

**डॉ० अनिल-कुमारः**
प्रवक्ता-संस्कृतम्, रा० व० मा० बाल-विद्यालयः, टीकरी कलां, दिल्ली।

**श्री रोशनलालः**
प्रवक्ता-संस्कृतम्, रा० व० मा० बाल-विद्यालयः, सु०पुरी मार्गः,नांगलोई, दिल्ली।

## लेखक-मण्डलम्

**डॉ. मनीषा तनेजा-** सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद् देहली

**डॉ. आभा झा-**प्रवक्त्री (संस्कृतम्), गार्गी-सर्वोदय-कन्या विद्यालयः, ग्रीनपार्कः, देहली-16

**डॉ. अनिल-कुमारः-** प्रवक्ता (संस्कृतम्), राजकीय-वरिष्ठ-माध्यमिक-बाल-विद्यालयः, टीकरी कलाँ देहली-41

**श्री रोशनलालः-** प्रवक्ता (संस्कृतम्), राजकीय-वरिष्ठ -माध्यमिक-बाल-विद्यालयः एस पी. रोड नांगलोई, देहली

**श्री रमेशचन्द्रः बुनकरः-** प्रवक्ता (संस्कृतम्), सर्वोदय-बाल-विद्यालयः, न०-2 पालम एंक्लेव, देहली-45

**डॉ. मनीषकुमारः त्रिपाठी-** प्रशिक्षित स्नातक शिक्षकः, (संस्कृतम्), राजकीय-वरिष्ठ-माध्यमिक-बाल-विद्यालयः, सी-ब्लॉक, दिलशाद गार्डन, देहली-95

**डॉ. सारुल तिवारी-** प्रशिक्षित-स्नातक-शिक्षिका, (संस्कृतम्), सर्वोदय-कन्या-विद्यालयः, आनन्दविहारः देहली-92

**डॉ गजाननधरेन्द्रः-**प्रशिक्षित- स्नातक-शिक्षकः, (संस्कृतम्), सर्वोदय-बाल-विद्यालयः नं. 2 सी ब्लॉक, जनकपुरी, देहली-58

**श्री रामगोपाल फगोडिया-** प्रशिक्षित-स्नातक-शिक्षकः,(संस्कृतम्), राजकीय-माध्यमिक-बाल-विद्यालयःनं. 2, खानपुरम्, देहली-80

**डॉ. श्रीरामः शर्मा-** प्रशिक्षित-स्नातक-शिक्षकः, (संस्कृतम्), राजकीय-सर्वोदय-बाल-विद्यालयः मटियाला, देहली

## प्रकाशनदलम्

**श्री दिनेश-कुमार-शर्मा,** ए.एस.ओ., राज्य-शैक्षिक अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**सुश्री फौज़िया,** राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

# पाठानुक्रमणिका


| | | | पृष्ठाङ्काः |
|---|---|---|---|
| | आमुखम् | | v |
| 1. | प्रथमः पाठः | संगच्छध्वं संवदध्वम् | 1 |
| 2. | द्वितीयः पाठः | अल्पानामपि वस्तूनां संहतिः कार्यसाधिका | 5 |
| 3. | तृतीयः पाठः | सुभाषितरसं पीत्वा जीवनं सफलं कुरु | 11 |
| 4. | चतुर्थः पाठः | प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महामना | 16 |
| 5. | पञ्चमः पाठः | गीता सुगीता कर्तव्या | 22 |
| 6. | षष्ठः पाठः | डिजिभारतम्-युगपरिवर्तनम् | 30 |
| 7. | सप्तमः पाठः | मञ्जुलमञ्जूषा सुन्दरसुरभाषा | 36 |
| 8. | अष्टमः पाठः | पश्यत कोणमैशान्यं भारतस्य मनोहरम् | 40 |
| 9. | नवमः पाठः | कोऽरुक्? कोऽरुक्? कोऽरुक्? | 49 |
| 10. | दशमः पाठः<br>एकादशः पाठः | सन्निमित्ते वरं त्यागः | 53 |
| 11. | द्वादशः पाठः | सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते | 58 |
| 12. | त्रयोदशः पाठः | वर्णोच्चारण–शिक्षा १ | 62 |

# आमुखम्

**शिक्षा** नाम मानवजीवनस्य दीपशिखेव अज्ञानतमसः समूलनाशिनी, प्रज्ञायाः विस्तारिणी, संस्काराणाञ्च संवाहिनी । सैव व्यक्तित्वस्य सम्यग्विकासस्य मूलाधारः, सा च समाजस्य सामञ्जस्यरूपिणी शक्तिः । यत्र शिक्षा नास्ति, तत्र मूढता, अव्यवस्था, नैतिकपतनञ्च दृश्यते। यत्र तु शिक्षा प्रज्वलति, तत्र विवेकः, नीतिः, प्रगतिः, लोककल्याणञ्च समुत्पद्यन्ते।

**शिक्षायाः** आधारः भाषा। भाषा मानवसमाजस्य प्रमुखं सम्प्रेषणसाधनम् अस्ति। भाषा विचारान्, भावान्, ज्ञानञ्च परस्परं प्रकटयितुं सामर्थ्यं प्रददाति। मनसः अन्तरङ्गवृत्तिः भाषया बहिः अभिव्यक्तिं प्राप्नोति। मानवजीवने संस्कारप्रवर्तनं, विद्याप्रसारः, सांस्कृतिकपरम्पराणां च संरक्षणं भाषया साध्यन्ते। न केवलं समाजे विचारसम्प्रेषणम् अपि तु विज्ञानकलासाहित्यादीनां विकासोऽपि भाषया सम्भाव्यते।

संस्कृतभाषा विश्वस्य प्राचीनतमा, समृद्धतमा च भाषा अस्ति। अस्याः मूलं वैदिकेषु मन्त्रेषु, उपनिषत्सु, दर्शनग्रन्थादिषु च दृश्यते। संस्कृतभाषायाम् एव वेदव्याकरणज्योतिषसाहित्यदर्शनादिविविधविषयाः सन्ति। अत्र शब्दसम्पदा अतीव समृद्धा, विचारसम्प्रेषणमद्भुतं, भावानाञ्च गाम्भीर्यं विचित्रम्। सभ्यतायाः उषःकालादारभ्य अद्यपर्यन्तं संस्कृतं न केवलं धार्मिके क्षेत्रे, अपितु विज्ञानक्षेत्रे, दर्शनक्षेत्रे, साहित्ये चापूर्वं योगदानं ददाति । भाषेयं भारतस्य संस्कृतेः परम्परायाःच हृदयस्थलम् इव दृश्यते ।

राष्ट्रीयशिक्षानीतौ (N.E.P.-2020) संस्कृतभाषायाः विशिष्टं महत्त्वम्। भाषेयं न केवलं भारतस्य प्राचीनपरम्पराणां गौरवम् आवहति, अपितु वैज्ञानिकविचारस्य, दार्शनिकचिन्तनस्य च मूलाधारा अपि। संस्कृतभाषा न केवलं प्राचीनन्याससंरक्षिका, अपि च नवभारतस्य निर्माणे आधारभूता । अत्र स्पष्टं निर्दिष्टं यत् संस्कृतं न केवलं वैकल्पिकविषयरूपेण, अपि तु सर्वशिक्षास्तरेषु पाठनीयम्।

**राष्ट्रीयशिक्षानीतिः** संस्कृतशिक्षणस्य क्षेत्रे नवीनपद्धतिं स्थापयित्वा तस्य व्यापकं प्रचलनं सुनिश्चितं करोति।

संस्कृतभाषायां श्रवणं ,भाषणं, पठनं लेखनञ्च चत्वारि कौशलानि सन्ति। यः श्रवणभाषणपठनलेखनादिषु संस्कृतभाषायाः शुद्धं विनियोगं कर्तुं शक्नोति सः संस्कृतभाषादक्षः उच्यते। आसु दक्षतासु शब्दज्ञानं,

व्याकरणज्ञानं, शुद्धोच्चारणं, सुस्पष्टवाक्यप्रयोगः च अपेक्षिताः। संस्कृतपठनस्य निरन्तराभ्यासः, श्लोकस्मरणम्, वार्तालापप्रयत्नः, भाषणलेखनकौशलविकासः च दक्षतासंवर्धने सहायकाः।

ज्ञानेन समं यथाकालं छात्राणां परीक्षणस्य आवश्यकता अपि भवति। एतेन अध्यापनस्य फलश्रुतिः ज्ञायते, छात्राः च स्वज्ञानस्य मापनं कर्तुं शक्नुवन्ति । परीक्षणं छात्राणां स्पर्धाभावं वर्धयति, अध्ययनप्रवृत्तिं च प्रोत्साहयति। परीक्षणस्य माध्यमेन छात्राः स्वदौर्बल्यं ज्ञात्वा तस्य परिहाराय यत्नं कुर्वन्ति। परीक्षणं केवलम् अङ्कप्राप्तये न, अपि तु व्यक्तित्वविकासाय आत्मविश्वासवृद्धये च साधनं भवति।

भाषाज्ञानपरीक्षणे इदमेवावलोक्यते यत् छात्राः भाषायाः प्रयोगे दक्षाः सन्ति वा न।

**अत्राष्टमकक्षायाः** पाठ्यपुस्तकं '**दीपकम्**' आश्रित्य **'दीपिका'** इत्यस्याः अभ्यासपुस्तिकायाः निर्माणं हि क्रियते। अस्यां अभ्यासपुस्तिकायां छात्राणामभ्यासाय षड्दक्षताः चिताः। एताः दक्षताः आश्रित्यैवात्र प्रश्नाः निर्मितास्सन्ति। दक्षताधारितप्रश्नाः छात्रेषु भाषानैपुण्यं जनयन्ति, चिन्तनाय प्रेरयन्ति दैनिकजीवने च भाषाप्रयोगाय नियोजयन्ति।

**अत्र षड्दक्षताः** सन्ति- अभिज्ञानम्,व्याकरणप्रयोगः,साहचर्यम्,तार्किकचिन्तनम्, चयनम् भाषाविस्तरश्चेति।

1. **अभिज्ञानम्-**अभिज्ञानदक्षतायाः स्मरणमेव आधारः। छात्रेण पूर्वं यत् पठितं ज्ञातं वा तत्सम्मुखे सति तस्य अवबोधः, ज्ञानं स्मरणञ्च अभिज्ञानं कथ्यते। अभिज्ञानदक्षतायुक्तः छात्रः नूतनज्ञानेन पूर्वज्ञानसम्बन्धं शीघ्रं स्थापयितुं शक्नोति । अयं गुणः अध्ययनस्य मूलाधारः।

2. **व्याकरणप्रयोगः-**भाषा व्याकरणमाश्रित्यैव प्रवर्तते। व्याकरणं विना शुद्धभाषणं शुद्धलेखनं वा अशक्यम्। व्याकरणप्रयोगकुशलः अन्येषां विचारं सरलतया अवबोधयितुं समर्थः यथाकालं च भाषाप्रयोगे अर्हः। यथा कथ्यतेऽपि- मुखं व्याकरणं स्मृतम्। व्याकरणकुशलः भाषाकुशलः अपि स्यात्।

3. **साहचर्यम्-** भाषायां साहचर्यपदेन ज्ञायते यत् छात्रः शब्दानां, धातूनां, प्रत्ययादिभाषिकतत्त्वादीनां सम्बन्धं स्थापयितुं समर्थः अस्ति नास्ति वा।

**शिक्षार्थिनः-** यदा शब्दानां वाक्यानां च पारस्परिकं सम्बन्धं जानन्ति, तदा अर्थबोधः सुलभो भवति। भाषायाः शब्दार्थयोः, पदविन्यासस्य, प्रयोगभेदस्य च साहचर्यं विना शिक्षणं न सिध्यति।

4. **तार्किकचिन्तनम्-** भाषा केवलं संप्रेषणस्य साधनं न, अपि तु विचारप्रकाशनस्य उपकरणञ्चास्ति। यदि छात्राः तार्किकतया चिन्तयितुं प्रशिक्ष्यन्ते, तर्हि ते स्ववाक्येषु युक्तिसङ्गतां संरचनां दातुं शक्नुवन्ति। एषा चिन्तनप्रक्रिया छात्राणां बुद्धेः विस्तारं करोति, विवेकं दृढं करोति, तर्काधारेण सत्यासत्यं पृथक्कर्तुं शिक्षयति।

तार्किकचिन्तनस्य प्रयोगे छात्रः प्रश्नानाम् उत्तरं केवलं स्मृत्या न ददाति, अपितु युक्त्या कारणैः सह प्रस्तौति। एतेन अभ्यासेन तेषां भाषाशक्तिः दृढा भवति, विचारप्रवाहः स्पष्टः भवति, आत्मविश्वासः च वर्धते।

5. **चयनम्-**भाषाशिक्षणे भिन्नप्रकृतिकपदानां समानार्थिपदानां वा चयनमपि एका प्रमुखा दक्षता । अत्र छात्राः बहुभ्यः पदेभ्यः पर्यायपदानि, विलोमपदानि वा चित्वा अभ्यासं कृत्वा स्वभाषाज्ञानं च सुदृढीकुर्वन्ति। योग्यचयनस्य साहाय्येन शिक्षार्थिनः भाषायाः सौन्दर्यं, प्रयोगशक्तिं च सहजतया अनुभवितुं शक्नुवन्ति।

6. **भाषाविस्तरः-** भाषाविस्तरः भाषाशिक्षणस्य परमं लक्ष्यं वर्तते। अत्र विद्यार्थिभिः पूर्वं पठितकार्यस्य अन्यासु परिस्थितिषु अन्येषु उदाहरणेषु वा प्रयोगः एव भाषाविस्तरः। भाषाशिक्षणं तदैव सम्पूर्णं मन्यते यदा छात्राः पठितभाषायाः स्वतन्त्ररुपेण प्रयोगं कर्तुम् अर्हाः। शिक्षार्थिनः केवलं पाठ्यपुस्तकपर्यन्तं न स्थातव्याः, अपि तु व्यावहारिकजीवने अपि भाषायाः प्रयोगं कर्तुम् अर्हन्ति। गृहकार्ये, खेलक्रीडायाम्, उत्सवेषु, लेखनादिविषयेषु भाषायाः प्रयोगः एव भाषाविस्तरः। तत्र नूतनाः विषयाः, आधुनिकप्रयुक्तयः, विज्ञानसम्बद्धाः शब्दाः च शिक्षणक्रमे सम्मेलयितव्याः। भाषायाः प्रयोगः यदा नानाक्षेत्रेषु भवति, तदा शिक्षार्थिनां आत्मविश्वासः वर्धते।

भाषाशिक्षणे अन्याः बह्वयः दक्षताः अपि भवितुम् अर्हन्ति परम् अत्र छात्राणां योग्यतासु अभिवृद्धिं कर्तुं, तेषाम् अभ्यासं सुदृढीकर्तुं तेषाञ्च भाषाज्ञानं परिष्कर्तुं अस्माभिः एताः दक्षताः चिताः। अत्र उद्देश्यमिदमेव वर्तते यत् छात्राः अत्रस्थानां दक्षतानाम् अभ्यासं कृत्वा प्रश्नोत्तरप्रदाने समर्थाः,शब्दप्रयोगे प्रवीणाः व्याकरणप्रयोगे दक्षाः, काव्यपाठे निपुणाः, सम्बन्धज्ञाने सिद्धाः शब्दचयने च चतुराः स्युः।

**‘दीपिका’** नाम्नीयं संस्कृत-अभ्यासपुस्तिका छात्राणां भाषा-अधिगमे साधनत्वेन रचिता। अस्याम् उपन्यस्ताः विविधाः अभ्यासप्रकाराः, अनेके प्रश्नाः, उदाहरणानि च छात्रेभ्यः संस्कृतभाषायाः सौन्दर्यं, व्याकरणस्य वैशद्यं, साहित्यस्य माधुर्यं च अनुभावितुं समर्थानि खलु ।

आशास्महे एषा **'दीपिका'** अभ्यासपुस्तिका विद्यार्थिनां संस्कृतशिक्षायाम् अभ्यासकारिणी,आत्मविश्वासवर्धिनी, मार्गदर्शिनी च सदा भविष्यति। सा तेषां शिक्षणपथि दीपशिखेव प्रकाशविस्तारिणी भूत्वा अध्ययनं श्रेयस्करं करिष्यति इति मे विश्वासः।

**डॉ. मनीषा तनेजा**

सहायक-आचार्या (संस्कृत)

राज्य-शैक्षिक-अनुसंधान एवं प्रशिक्षण-परिषद्, दिल्ली

# प्रथमः पाठः
# संगच्छध्वं संवदध्वम्

**पाठपरिचयः-** अये वेदप्रियाः प्रियच्छात्राः! वयं पठितवन्तः यत् वेदाः अस्माकम् इतिहासस्य न्यासमिव प्राचीनतमाः ग्रन्थास्सन्ति। तेषां मन्त्राः जनान् विश्वस्य कल्याणाय प्रेरयन्ति। वयम् अस्मिन् पाठे पठितवन्तः यत् जनैक्यं सर्वेषाञ्च समभावः विश्वशान्तेः आधारः। एकता एव **'वसुधैव कुटुम्बकम्'** इत्यस्य विचारस्य साधिका। आगच्छन्तु दक्षताधारितप्रश्नानाम् अभ्यासं कुर्मः।

**1. विशेष्यैः सह विशेषणानि योजयन्तु।** (चयनम् ,साहचर्यम्)

| स्तम्भः 'क' | स्तम्भः 'ख' |
|---|---|
| (क) मन्त्रः | (1) समानम् |
| (ख) मन्त्रम् | (2) समानम् |
| (ग) समितिः | (3) समानः |
| (घ) हविषा | (4) समानी |
| (ङ) मनः | (5) समानेन |

**2. उदाहरणमनुसृत्य वाक्यद्वयं 'क्त्वा'प्रत्ययेन योजयित्वा लिखन्तु।** (भाषाविस्तरः)

**यथा- सर्वे प्रणामाञ्जलिं कुर्वन्ति।**

**सर्वे गच्छन्ति।** **सर्वे प्रणामाञ्जलिं कृत्वा गच्छन्ति।**

(क) बालकः प्रातः स्नाति। 1. ............................................
बालकः विद्यालयं गच्छति।

(ख) सः विद्यालयं गच्छति। 2. ............................................
सः पुस्तकं पठति।

(ग) देवः पुस्तकं पठति। 3. ............................................
देवः गृहम् आगच्छति।

(घ) बालकः स्यूतं स्थापयति। 4. ............................................
बालकः विश्रमति।

(ङ) पिता भोजनं पचति। 5. ............................................
पिता बालकं खादयति।

**3. कोष्ठकप्रदत्तधातुभिः सह 'ल्यप् 'प्रत्ययं प्रयुज्य रिक्तस्थानानि पूरयन्तु । (व्याकरणप्रयोगः)**

(क) नरः शुद्धवस्त्राणि ........................ मन्दिरं गच्छेत्। (परि+धा)

(ख) सर्वे वैमनस्य भावं........................ वसेयुः।(परि+त्यज्)

(ग) जनाः गृहम् ........................ भोजनं कुर्युः। (आ+गम्)

(घ) लोकाःमहापुरुषान् ........................ एव व्यवहारं कुर्युः। (अव+लोक्)

(ङ) वयं मनः ........................ कार्यं कुर्युः। (सम्+युज्)

**4. पट्टिकायां प्रदत्तपदानां समक्षं तेषां समानार्थकानि पदानि अधोप्रदत्तपट्टिकातः चित्वा लिखन्तु । (साहचर्यं, सम्बन्धज्ञानम्)**

| मनः | समितिः | मन्त्रः |
|---|---|---|
| ................................ | ................................ | ................................ |
| ................................ | ................................ | ................................ |
| ................................ | ................................ | ................................ |
| ................................ | ................................ | ................................ |

| पट्टिका | समज्या, चित्तः, चेतः, परिषद्, परामर्शः, हृदयम्, स्वान्तः, गोष्ठी, सभा, मन्त्रणा, संसद्, मानसम्, आस्था |
|---|---|

5. **'वः' स्थाने 'युष्माकम्' 'नः' च स्थाने 'अस्माकम्' पदं प्रयुज्य वाक्यपरिवर्तनं कुर्वन्तु।**
**(भाषाविस्तरः)**

**यथा-** शुभकामाः **वः** शुभाय भवन्तु। = शुभकामाः **युष्माकं** शुभाय भवन्तु।

**यथा-** देवः **नः** रक्षां सम्पादयतु। = देवः **अस्माकं** रक्षां सम्पादयतु।

(क) औषधयः वः मङ्गलाय भवन्तु। =

(ख) नीतिकथाः नः हितं साधयन्ति। =

(ग) वीरगाथाः नः राष्ट्रभक्तिं वर्धयन्ति। =

(घ) गुरुणाम् आशीर्वादाः वः सौभाग्यविषयाः =

(ङ) आदर्शपुरुषाः नः प्रेरणास्रोतांसि। =

6. **अधः प्रदत्तेभ्यः क्रियापदेभ्यः लट्लकारस्य लोट्लकारस्य च क्रियाः पृथक् कृत्वा लिखन्तु।**
**(चयनं, व्याकरणप्रयोगः)**

| पट्टिका | जानामि, वदन्तु, आगच्छन्तु, सन्ति, मन्यन्ते, कुर्मः, जानीत, प्राप्नुत, अस्तु, प्रकटयामि |
|---|---|

| **लट्लकारः** | **लोट्लकारः** |
|---|---|
| .......................... | .......................... |
| .......................... | .......................... |
| .......................... | .......................... |
| .......................... | .......................... |
| .......................... | .......................... |

## गतिविधिः

**क्रीडा- 'वाक्यविस्तरः'**

**अध्यापकः** कक्षां गत्वा छात्राणां सम्मुखं प्रश्नम् उपस्थापयति-

भारतीयराष्ट्रियैकतायां केषां महत्त्वम्?

अत्र एकः छात्रः किमपि मूल्यं / गुणं कथयति, द्वितीयः छात्रः प्रथमच्छात्रेण कथितेन मूल्येन/ गुणेन सह स्वकीयं एकं नूतनं मूल्यं/ गुणं कथयिष्यति, अन्ये छात्राः एवं क्रमेण करिष्यन्ति।

**यथा-** प्रथमः- सर्वधर्मसमभावः

द्वितीयः- सर्वधर्मसमभावः, जातिप्रथोन्मूलनम्

तृतीयः- सर्वधर्मसमभावः, जातिप्रथोन्मूलनम्,

परस्परं प्रेमभावः ........ ...एवं गतिविधिः प्रचलिष्यति।

## भारतीयज्ञानपरम्परा

| वेदाः | उपवेदाः | ऋत्विजः | आचार्याः |
|---|---|---|---|
| ऋग्वेदः | आयुर्वेदः | होता | पैलः |
| यजुर्वेदः | धनुर्वेदः | अध्वर्युः | वैशम्पायनः |
| सामवेदः | गान्धर्ववेदः | उद्गाता | जैमिनी |
| अथर्ववेदः | अर्थवेदः/स्थापत्यवेदः | ब्रह्मा | सुमन्तुः |

◆◆◆


## द्वितीय: पाठ:

# अल्पानामपि वस्तूनां संहति: कार्यसाधिका


**पाठपरिचय:-** प्रिया: उत्साहिन: छात्रा:! पाठेऽस्मिन् वयं हितोपदेशस्य **'अल्पानामपि वस्तूनां संहति: कार्यसाधिका'** कथां पठितवन्त:। कथाया: सारांशोऽयं वर्तते यत् वयं अस्माकं गुरूजनानाम् उपदेशं मत्वा कस्याश्चिदपि विपत्ते: पारं गन्तुं शक्नुम:, तथा च मिलित्वा कस्या: अपि समस्याया: समाधानं कर्तुं समर्था:। आयान्तु सम्प्रति संस्कृतदक्षतायै केषाञ्चन प्रश्नानाम् समाधानं कुर्म:।

**1. चक्रे प्रदत्तानि धातु-प्रत्यययो: संयोजनं कृत्वा लिखन्तु ।** (व्याकरण प्रयोग:)

(क)




(ख)




**2. अध: रेखाङ्कितपदयो: सन्धिं कृत्वा वाक्यानि पुन: लिखन्तु ।** (व्याकरणप्रयोग:)

(क) <u>व्याध: + तत्र</u> गत्वा जालं विस्तारयति ।

(1) ........................................।

(ख) वने <u>क:+ चित्</u> कपोत: प्रतिवसति स्म।

(2) ........................................।

(ग) <u>बालक: + अत्र</u> गुरुं प्रणम्य विद्याम् आरभते।

(3) ........................................।

(घ) <u>स:+अस्माकं</u> हितैषिरूपेण प्रतीयते ।

(4) ........................................।


(ङ) नमः+ ते सदा वत्सले मातृभूमेः ।

(5) .....................................।


## 3. चित्रं दृष्ट्वा वाक्यानि रचयन्तु । (भाषाविस्तरः)

(क).  = 


छात्रः कक्षां प्रविशति। छात्रः कक्षां **प्रविश्य** पठति।

 = 



(ख) ................................. = .................................

 = 

(ग) ................................. = .................................

 = 

(घ) ................................ = ................................

 = 

(ङ) ................................ = ................................

**4. उदाहरणानुसारं वाक्यं संवादे परिवर्तयन्तु ।** **(भाषाविस्तर:)**

**उदाहरणम् -:** रामः मित्रं कथयति- "मया साकं पुस्तकालयं चलतु।"

**रामः - मित्र! मया साकं पुस्तकालयं चलतु ।**

(क) रमेश: रोशनं कथयति- "आवां छात्रसम्मेलनाय जयपुरं गच्छाव:।"

..........................................................................................

(ख) कपोत: कपोतराजं वदति- "अहं भवत: आज्ञां पालयामि।"

..........................................................................................

(ग) नायिका नायकं प्रति- "आवाम् उद्याने भ्रमणं कुर्व:।"

..........................................................................................

(घ) शिक्षकः शिष्यम् आदिशति- "त्वं वेदपाठं कुरु ।"

..........................................................................................................

5. **अधोलिखितानां पदानां समस्तपदं विग्रहं वा कुर्वन्तु ।** (भाषाविस्तर:)

**यथा- लक्ष्यस्य प्राप्तेः - लक्ष्यप्राप्तेः**

| विग्रहः | | समासः |
|---|---|---|
| (क) आकाशस्य मार्गेण | = | ............................ |
| (ख) नायकस्य धर्मेण | = | ............................ |
| (ग) ............................ | = | विवरसमीपम् |
| (घ) लोके सिद्धम्। | = | ............................ |
| (ङ) ............................ | = | पाशबद्धान् |

6. **सुभाषितानुसारं मेलनं कुर्वन्तु ।** (अभिज्ञानं साहचर्यं च)

| (क) | (ख) |
|---|---|
| विपदि | व्यसनम् |
| अभ्युदये | वाक्पटुता |
| सदसि | विक्रमः |
| युधि | क्षमा |
| यशसि | अभिरुचिः |
| श्रुतौ | धैर्यम् |

7. अधोलिखितानि क्रियापदानि लकारानुसारं पट्टिकात: चित्वा लिखन्तु । (चयनम्)

| पट्टिका | अवदत्, शक्नुम:, भविष्यति, अभवन्, सम्भवति, श्रावयामि, अब्रवीत्, छेत्स्यति, गमिष्याम: |
|---|---|

| लट् लकार: | लङ् लकार: | लृट् लकार: |
|---|---|---|
| 1. ........................ | 1. ........................ | 1. ........................ |
| 2. ........................ | 2. ........................ | 2. ........................ |
| 3. ........................ | 3. ........................ | 3. ........................ |

## गतिविधि:

**क्रीडा - शब्दान्त्याक्षरी**

**शिक्षक:** सर्वप्रथममेकं शब्दं वदति छात्र: अधुना तस्य शब्दस्य अन्तिमं वर्णम् आधाय एकं नूतनं शब्दं वदिष्यति।
**यथा-**

'कपोत:' (अन्तिम: वर्ण: - **त**)

'तक्षक:' (अन्तिम:वर्ण: - **क**)

'कक्षा' (**क्ष**) ..........

अनेन क्रमेण शब्दान्त्याक्षरी प्रचलिष्यति।

## भारतीयज्ञानपरम्परा

| क्रमः | संस्कृतसूक्तयः | भावार्थः |
|---|---|---|
| 1. | एकस्य दुःखं दुःखं स्यात् सर्वेषां तु सुखाय च।<br>एकस्य सुखम् एव स्यात् सर्वेषां तु विपत्तये॥ | एक का दुःख सबका दुःख बन जाता है, पर एक का सुख केवल उसी का होता है। इसलिए मिल-जुलकर रहना आवश्यक है। |
| 2. | एकस्य हि रिपोर्नाशो न श्रेयो बहूनामपि।<br>संहतस्य तु नाशेन नाशः स्यात् समग्रतः॥ | एक शत्रु का नाश विशेष लाभ नहीं देता, परन्तु यदि एकता नष्ट हो जाए तो सबका नाश हो जाता है। |
| 3. | एकेन धृतमालम्बं सुलभं धर्तुमर्हति।<br>न तु वज्रनिपातेन स्तम्भोऽप्येकः प्रधर्ष्यते॥ | अकेला सहारा पर्याप्त नहीं होता, पर अनेक मिलकर प्रहार भी सह लेते हैं। |
| 4. | संघे शक्तिः कलौ युगे | कलियुग में वास्तविक शक्ति केवल संगठन में है। |
| 5. | दुर्बलस्य बलं सङ्घे | दुर्बल का बल भी केवल संघ/एकता में होता है। |

◆◆◆

## तृतीयः पाठः
# सुभाषितरसं पीत्वा जीवनं सफलं कुरु

**पाठपरिचयः-** मधुरभाषिणः प्रियच्छात्राः! अस्मिन् पाठे वयं जीवनोपयोगिनः सुभाषितरसं पीतवन्तः। एतेषु सुभाषितेषु वयम् अस्माकं भारतभूमेः महत्तायाः, गुणानां, परोपकारिणां पुरुषाणां परीक्षणविधीनां, अष्टानां गुणानां, सभायाः विशेषतानां, दुर्जनसङ्गस्य पुरुषार्थस्य च विषये पठितवन्तः। आगच्छन्तु! अधुना वयम् अस्य पाठस्य दक्षताधारिताभ्यासं कुर्मः।

**1. अधोलिखितवाक्यानि पठित्वा पट्टिकायाम् 'आम्' / 'न' वा लिखन्तु।** (अभिज्ञानम्)

(क) गुणी गुणं जानाति। [ ]

(ख) निर्गुणः गुणं न जानाति। [ ]

(ग) बली बलं न जानाति। [ ]

(घ) निर्बलः बलं जानाति। [ ]

(ङ) पिकः वसन्तस्य गुणं जानाति। [ ]

(च) वायसः वसन्तस्य गुणं जानाति। [ ]

(छ) गजः सिंहस्य बलं जानाति। [ ]

**2. चित्राणि दृष्ट्वा पट्टिकातः पदानि चित्वा रिक्तस्थानानि पूरयन्तु।** (सम्बन्धः)

(क) कनकं परीक्ष्यते।

1. ____________________
2. ____________________
3. ____________________
4. ____________________



(खं) पुरुषः परीक्ष्यते।

1. ____________________

2. ____________________

3. ____________________

4. ____________________



| पट्टिका | कुलेन, तापेन, शीलेन, छेदनेन, ताडनेन, गुणेन, कर्मणा, निघर्षणेन |
|---|---|

**3. पट्टिकातः पदानि चित्वा रिक्तस्थानानि पूरयन्तु । (चयनम्)**

(च) यत्र वृद्धाः सन्ति सा —— भवति।

(ख) ये धर्मं वदन्ति ते ———— भवन्ति।

(ग) यत्र सत्यम् अस्ति सः —— भवति।

(घ) यत् छलरहितं तत् —— अस्ति।

(ङ) पुरुषकारेण विना —— न सिध्यति।

| पट्टिका | सत्यम्, धर्मः, वृद्धाः, भाग्यम्, सभा |
|---|---|

**4. अधोलिखितप्रश्नानाम् उत्तराणि स्वभाषया वाक्यद्वयं लिखन्तु । (तार्किकं चिन्तनम्)**

(क) सत्पुरुषाणां स्वभावः कीदृशः भवति?

____________________________

____________________________

(ख) दुर्जनेन सह मैत्री कथं भवति?

____________________________

____________________________

(ग) ये भारतभूमिभागे जन्म लभन्ते, ते सौभाग्यशालिन: कथं सन्ति?

______________________________

______________________________

**5. 'परोपकाराय के किं कुर्वन्ति' अध: प्रदत्तां तालिकां दृष्ट्वा वाक्यानि रचयन्तु ।**
**(तार्किकचिन्तनम्)**

| | | |
|---|---|---|
| नद्य: | परोपकाराय | जीवन्ति |
| वृक्षा: | | नमन्ति |
| मेघा: | | फलन्ति |
| सत्पुरुषा: | | वहन्ति |
| गुणिजना: | | वर्षन्ति |

**(क) नद्य: परोपकाराय वहन्ति।**

(ख) ____________________

(ग) ____________________

(घ) ____________________

(ङ) ____________________

**6. स्तम्भयो:मेलनं कुर्वन्तु । (अभिज्ञानम्)**

| स्तम्भ: क | स्तम्भ: ख |
|---|---|
| (क) यथा ह्येकेन चक्रेण | (1) धन्यास्तु ते भारतभूमिभागे |
| (ख) दुर्जनेन समं सख्यं | (2) न रथस्य गतिर्भवेत् । |
| (ग) गायन्ति देवा: किल गीतकानि | (3) प्रीतिं चापि न कारयेत् |
| (घ) न सा सभा यत्र न सन्ति वृद्धा: | (4) प्रज्ञा च कौल्यं च दम: श्रुतं च |
| (ङ) अष्टौ गुणा: पुरुषं दीपयन्ति | (5) वृद्धा: न ते ये न वदन्ति धर्मम् |

7. विशेषण-विशेष्ययो: मेलनं कुर्वन्तु । (साहचर्यम्)

| क | ख |
|---|---|
| एकेन | दूरविलम्बिन: |
| अनुद्धताः | चक्रेण |
| नम्राः | तरवः |
| घनाः | सत्पुरुषाः |
| शीतः | अङ्गारः |

8. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु । (भाषा-विस्तरः)

**यथा-** दुर्जनेन **सह** मित्रता न करणीया । (दुर्जन)

(क) ________ **विना** फलं न सिध्यन्ति । (परिश्रम)

(ख) ________ **विना** जीवनं नास्ति । (जल)

(ग ) पिता ________ **सह** आपणं गच्छति। (पुत्र)

(घ) ________ तापसः । (वस्त्र)

(ङ) ________ खञ्जः । (पाद)

## गतिविधि:

(1) (क) छात्रान् वर्गद्वये विभज्य चर्चां कुर्वन्तु।

सुहृद् - दुष्टयोः मध्ये कः भेदः?

(ख) कोच्चारणप्रतियोगितायाः आयोजनम्।

(ग) भारतभूमिभागे के देवाः जन्म प्राप्तवन्तः?

(2) केषाञ्चन पञ्चानां रामसदृशानां महापुरुषाणां सूचीं निर्मापयन्तु।

## भारतीयज्ञानपरम्परा

"अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।''

"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥"

"उदेति सविता ताम्रः ताम्र एवास्तमेति च
सम्पत्तौ विपत्तौ च महतामेकरुपता।"

"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।

"अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।"

◆◆◆

## चतुर्थः पाठः
# प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महामना

**पाठपरिचयः-** पाठेऽस्मिन् उत्कलमणेः गोपबन्धुदासस्य जीवनं, त्यागः, समाजसेवा, देशभक्तिश्च वर्ण्यन्ते। सः ओडिशाराज्यस्य महान् समाजसेवकः, स्वतन्त्रतासेनानी, शिक्षकः, लोकसेवकश्चासीत्। सः स्वकीयं सम्पूर्णं जीवनं दरिद्रसेवायां, जलप्लावपीडितजनसेवायां जनेषु, देशसेवायां चार्पितवान्। गोपबन्धोः जीवनम् अस्मान् शिक्षयति यत् परोपकाराय राष्ट्रसेवायै च अस्माकं जीवनं भवेत्।




आगच्छन्तु अधुना वयं पाठाधृत्य दक्षताधारितप्रश्नानामपि अभ्यासं कुर्मः।

**1. उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखन्तु । (अभिज्ञानम्)**

1) गोपबन्धुः सत्यवादिवनविद्यालये पाठितवान्। [ ]

2) लालबहादुरशास्त्रिणः प्रेरणया गोपबन्धुः भारतीयस्वतन्त्रतान्दोलने भागं गृहीतवान्। [ ]

3) सः 'बन्दीर आत्मकथा', 'काराकविता', 'गोमाहात्म्यम्' इत्यादीनि पुस्तकानि लिखितवान्। [ ]

4) गोपबन्धुदासस्य जन्म उत्तरप्रदेशे अभवत्। [ ]

5) आचार्यः प्रफुल्लचन्द्ररायः गोपबन्धुम् 'उत्कलमणिः' इति उपाधिना सम्मानितवान्। [ ]

6) गोपबन्धुदासः ओडिशाराज्ये एकः महान् चिकित्सकः आसीत्। [ ]

**2. अधोलिखितानाम् उपाधीनां समक्षं सम्बन्धितानां देशसेविनां समाजोद्धारकानां वा पट्टिकातः चयनं कृत्वा रिक्तस्थानानि पूरयन्तु ।** **(चयनम्)**

| |
|---|
| बालगङ्गाधर- तिलकः, लाला लाजपतरायः, लता मङ्गेशकरः, महात्मागान्धीः, भीमराव-अम्बेडकरः, सरदार-बल्लभभाई-पटेलः, सुभाषचन्द्र-बोसः |

| | उपाधिनाम | उपाधिना विभूषितः जनः |
|---|---|---|
| क) | राष्ट्रपिता | ............................ |
| ख) | लौहपुरुषः | ............................ |
| ग) | नेताजी | ............................ |
| घ) | संविधान-निर्माता | ............................ |
| ङ) | स्वर-कोकिला | ............................ |
| च) | लोकमान्यः | ............................ |
| छ) | पंजाब-केसरी | ............................ |

**3. अधोलिखितानां प्राकृतिक-आपदानां चित्रं दृष्ट्वा मानवजीवने तेषां प्रभावविषये स्वभाषया लिखन्तु ।** **(भाषाविस्तरः)**

| | | |
|---|---|---|
| क |  | ........................................................................<br>........................................................................<br>........................................................................<br>........................................................................ |

| | | |
|---|---|---|
| ख |   | ..........................................................<br>..........................................................<br>..........................................................<br>.......................................................... |
| ग |   | ..........................................................<br>..........................................................<br>..........................................................<br>.......................................................... |
| घ |   | ..........................................................<br>..........................................................<br>..........................................................<br>.......................................................... |
| ङ |   | ..........................................................<br>..........................................................<br>..........................................................<br>.......................................................... |

4. **अधोलिखितानां वाक्यानां बहुवचने परिवर्तनं कुर्वन्तु ।** (व्याकरण-प्रयोगः)

| **एकवचने प्रयोगः** | **बहुवचने प्रयोगः** |
|---|---|
| **उदाहरणम्- छात्रः प्रश्नं पृष्टवान्।** | **छात्राः प्रश्नान् पृष्टवन्तः।** |
| क) बालकः कन्दुकेन क्रीडितवान्। | .................................... |
| ख) लेखिका पत्रं लिखितवती। | .................................... |
| ग) शिष्यः पाठम् अधीतवान्। | .................................... |
| घ) बालिका फलं खादितवती। | .................................... |
| ङ) कृषकः क्षेत्रं कर्षितवान्। | .................................... |
| च) अहं पुस्तकं पठितवान्। | .................................... |

5. **सन्धिं कृत्वा निर्मितान् शब्दान् निर्देशानुसारं परिवर्तयन्तु ।** (भाषाविस्तरः)

**यथा- नर + इन्द्रः = नरेन्द्रः। नरेन्द्राय धनं ददातु। (चतुर्थी एकवचने)**

1) सु + उक्तिः = .............. । .............. अस्मान् सन्मार्गं प्रति नयन्ति। (प्रथमा बहुवचने)

2) लोक + ईशः = .............. । प्रणवः .............. सह आपणं गतवान्। (तृतीया एकवचने)

3) ध्वनि + आलोकं = .............. । सञ्जयः श्वः .............. पठिष्यति। (द्वितीया एकवचने)

4) राघव + इन्द्रः = .............. । .................. नमः। (चतुर्थी एकवचने)

5) विद्या + उत्तमा = .............. । .................. माता शिक्षिका अस्ति। (षष्ठी एकवचने)

6. **विलोमपदेन योजयन्तु ।** (साहचर्यम्)

| **शब्दाः** | **विलोमपदानि** |
|---|---|
| स्वतन्त्रता | साक्षरता |
| बहिः | लाभः |
| हानिः | नीचैः |
| निरक्षरता | अन्तः |
| उच्चैः | परतन्त्रता |

**7. अधोलिखितेभ्य: वाक्येभ्य: अव्ययपदानि चित्वा रिक्तस्थानेषु लिखन्तु । (अन्वेषणम्)**


| वाक्यानि | अव्ययपदानि |
|---|---|
| जलप्लावेन तत्र महती हानिः सञ्जाता । | ...................... |
| सम्प्रति वयं गोपबन्धोः विषये जानीमः। | ...................... |
| जन्मभूमेः दुर्दशामवलोक्य स सर्वदा चिन्ताकुलो भवति स्म। | ...................... |
| गोपबन्धुः अद्यापि जनमानसेषु समादृतोऽस्ति। | ...................... |
| एकदा हरिहरदासः अध्यापकान् भोजनाय आमन्त्रितवान्। | ...................... |

## गतिविधिः

**क्रीडा- योगदानं वद**

अध्यापकः कक्षायां देशसेवा-समाजसेवारतजनानां चित्रं दर्शयित्वा तेषांयोगदानं विषये छात्रान् पञ्च-षट् वाक्येषु वक्तुं प्रेरयिष्यति।

**यथा-**





## भारतीयज्ञानपरम्परा

अधः कतिपय समाजसुधारकाणां राष्ट्रभक्तानां वा सम्वन्धितानि राज्यानि तेषां कार्यक्षेत्राणि च सूच्यन्ते-

| समाजसुधारकाः | | राज्यनाम | सम्बन्धितं क्षेत्रम् / कार्यम् |
|---|---|---|---|
| क) | राजा राममोहन-रायः | बङ्गप्रदेशम् | सतीप्रथायाः उन्मूलनम् |
| ख) | कैलाश-सत्यार्थी | मध्यप्रदेशम् | बालश्रम-निवारणम् |
| ग) | बिरसा मुण्डा | झारखण्डम् | आदिवासिजनानां अधिकाररक्षणम् |
| घ) | सावित्रीबाईफुले | महाराष्ट्रम् | भारतस्य प्रथमा महिला शिक्षिका |
| ङ) | सुन्दरलाल-बहुगुणा | उत्तराखण्डम् | पर्यावरणसंरक्षणम् |
| च) | स्वामि-विवेकानन्दः | बङ्गप्रदेशम् | धर्मजागरणम् |
| छ) | पण्डिता रमाबाई | महाराष्ट्रम् | स्त्रीशिक्षा |

पञ्चमः पाठः

# गीता सुगीता कर्तव्या

**पाठपरिचयः-** भो! प्रियाः कर्मनिष्ठाः छात्राः! गीता भगवता श्रीकृष्णेन अर्जुनाय जगद्धिताय उपदिष्टा, धर्मग्रन्थेषु श्रेष्ठा काव्यरत्नमिव प्रसिद्धा अस्ति। अस्याः पठनेन मानवस्य जीवनमार्गः सुस्पष्टः भवति। गीता केवलं धर्मोपदेशः न, अपितु कर्मयोग-भक्तियोग-ज्ञानयोगादीनां समन्वयः अस्ति।



कर्मयोगः ज्ञानयोगः भक्तियोगः

अत्र उपदिष्टं यत्- गीता यदि सुगीता (अर्थगर्भितया) अध्येया तर्हि मानवस्य जीवनं सफलं स्यात्।आगच्छन्तु अधुना पाठमाधृत्य दक्षताधारितप्रश्नानामभ्यासं कुर्मः।

**1. श्लोकांशान् योजयन्तु ।** **(अभिज्ञानम्, साहचर्यम्)**

| | | |
|---|---|---|
| क) | प्रियवाक्यप्रदानेन | वचने का दरिद्रता। |
| ख) | स्वाध्यायाभ्यसनं चैव | स्थितधीर्मुनिरुच्यते। |
| ग) | तस्मात् तदेव वक्तव्यं | बुद्धिनाशात्प्रणश्यति। |
| घ) | वीतरागभयक्रोधः | सर्वे तुष्यन्ति जन्तवः। |
| ङ) | स्मृतिभ्रंशाद् बुद्धिनाशो | वाङ्मयं तप उच्यते। |

2. अधोलिखितेषु पदेषु उपसर्गं संयोज्य विभज्य वा लिखन्तु- (व्याकरणप्रयोग:)

क) निरहङ्कार: = ............................ + ............................

ख) सुगीता = ............................ + ............................

ग) सम् + मोह: = ............................ + ............................

घ) प्रणश्यति = ............................ + ............................

ङ) अधि + गच्छति = ............................ + ............................

3. जीवनमूल्यसम्बद्धग्रन्थानां नामानि लेखकै: सह मेलयन्तु । (अभिज्ञानम्)

| | |
|---|---|
| क) नीतिशतकम् | (1) कामन्दक: |
| ख) हितोपदेश: | (2) कौटिल्य: |
| ग) पञ्चतन्त्रम् | (3) नारायणपण्डित: |
| घ) चाणक्यनीति: | (4) भर्तृहरि: |
| ङ) नीतिसार: | (5) विष्णुशर्मा |

4. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयन्तु । (भाषाविस्तर:)

क) जन्तव: - ........................................

ख) वाक्यम् - ........................................

ग) भवति - ........................................

घ) ज्ञानम् - ........................................

ङ) सन्तुष्ट: - ........................................

**5 . उदाहरणमनुसृत्य प्रत्ययान्तपदं निर्मीय त्रिषु लिङ्गेषु, एकवचने च पदानि रचयन्तु ।**
**(व्याकरणप्रयोगः)**

| क्रमः | धातुः | प्रत्ययः | प्रत्ययान्तपदम् | पुल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|---|---|
| **यथा** | **पठ्** | **अनीयर्** | **पठनीय** | **पठनीयः** | **पठनीया** | **पठनीयम्** |
| 1. | पाल् | अनीयर् | | | | |
| 2. | कृ | अनीयर् | | | | |
| 3. | खाद् | अनीयर् | | | | |
| 4. | गम् | अनीयर् | | | | |
| 5. | पा | अनीयर् | | | | |

**6. अधोलिखितानि वाक्यानि पठित्वा सत्यम्/असत्यं वा लिखन्तु । (तार्किकचिन्तनम्)**

क) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। [____________]

ख) श्रीमद्भगवद्गीतायाः उपदेशः कुरुक्षेत्रे जातः । [____________]

ग) श्रीमद्भवद्गीतायाः वक्ता अर्जुनः अस्ति। [____________]

घ) श्रीमद्भवद्गीता संस्कृतभाषायां निबद्धा अस्ति [____________]

ङ) श्रीकृष्णः एव योगेश्वरः अस्ति । [____________]

च) कुरुक्षेत्रे गीता-जयन्ती-महोत्सवः आचर्यते । [____________]

छ) श्रीकृष्णस्य उपदेशः एव श्रीमद्भगवद्गीता अस्ति [____________]

7. **रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुर्वन्तु ।** (तार्किकचिन्तनम्)

**यथा- भगवान् श्रीकृष्णः <u>अर्जुनम्</u> उपदिशति।**

**प्रश्नः- भगवान् श्रीकृष्णः <u>कम्</u> उपदिशति?**

क) श्रद्धावान् **<u>ज्ञानं</u>** लभते ।

**प्रश्नः-** ................................................

ख) **<u>क्रोधात्</u>** सम्मोहः भवति ।

**प्रश्नः-** ................................................

ग) ज्ञानं लब्ध्वा अचिरेण परां **<u>शान्तिम्</u>** अधिगच्छति ।

**प्रश्नः-** ................................................

घ) **<u>गीतायाम्</u>** अमृततुल्याः उपदेशाः सन्ति ।

**प्रश्नः-** ................................................

ङ) कार्यक्षेत्रे जीवनक्षेत्रे च **<u>गीतायाः</u>** उपदेशाः अनुपालनीयाः।

**प्रश्नः-** ................................................

8. **अधोलिखितेषु वाक्येषु रेखाङ्किपदानि शुद्धं कृत्वा लिखन्तु ।** (व्याकरणप्रयोगः)

(क) कुरुक्षेत्रे कौरवाणां पाण्डवानां च मध्ये सङ्ग्रामः **<u>अभवन्</u>** ।

(ख) गीतायाः अभ्यासः सम्यक् रूपेण **<u>करणीया</u>**।

(ग) मानवः यदा क्रोधितः भवति तदा **<u>क्रोधात्</u>** अविवेकः उत्पद्यते ।

(घ) ये सत्यस्य दर्शनं कृतवन्तः **<u>सः</u>** एव यथार्थज्ञानिनः भवन्ति ।

(ङ) **<u>ये</u>** निरन्तरं सन्तुष्टः भवति, सः मम अतीव प्रियतमः भक्तः भवति ।

(च) शास्त्रादीनां स्वाध्यायः, तेषाम् अभ्यासः च वाचिकं तपः **<u>कथ्यन्ते</u>** ।

## गतिविधि:

### गीता–सन्देशचित्रम्

**प्रक्रिया-**


1. **अध्यापकः गीतायाः कतिपयमुख्यसन्देशान् छात्रान् सूचयेत्।**

**यथा–**

कर्मयोगः (कर्तव्यपालनम्)
भक्तियोगः (ईश्वरश्रद्धा)
ज्ञानयोगः (सत्यम्–विवेकः)

2. **छात्राः लघुसमूहेषु विभज्य गीतायाः संदेशानां चित्रमाध्यमेन प्रस्तुतिं कुर्युः।**

चित्रस्य अधः वाक्यद्वयं वाक्यत्रयं वा संस्कृतभाषया लिखन्तु।



..........................................................................................

..........................................................................................


..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................





## भारतीयज्ञानपरम्परा

गीयते इति गीता । गीताः नैका: सन्ति यथा- अष्टावक्र-गीता, दत्तात्रेय–गीता, हनुमान-गीता, राम-गीता इत्यादय:। कृष्णार्जुनयो: संवादः श्रीमद्भगवद्गीता नाम्ना ज्ञायते। अत्र षटकत्रयं विद्यते- कर्म-ज्ञान-भक्तियोगश्च ।

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दन:।**
**पार्थो वत्स: सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।**

अत्र सर्वा उपनिषद:-

**ईश–केन–कठ–प्रश्न–मुण्ड–माण्डूक्य–तित्तिरिः।**
**एतरेय च छान्दोग्यं बृहदारण्कं तथा ।।**

**सारः-** गीता (गावः), दोग्धा (श्रीकृष्णः), वत्सः (अर्जुनः), भोक्ता (सुधीः), दुग्धं (गीतामृतम्)।

श्रीमद्भगवद्गीता महाभारते भीष्मपर्वणि वर्तते। यथैकादशोपनिषदः तथैव अष्टादश पुराणानि भवन्ति। तत्र श्रीमद्भागवतपुराणमेकम् । श्रीमद्भागवतपुराणम् श्रीमद्भगवद्गीता च इमौ ग्रन्थौ नाम्ना सदृशौ प्रतीयेते परं द्वावपि भिन्नौ स्तः।



| क्रमः | श्रीमद्भगवद्गीता | श्रीमद्भागवत- महापुराणम् |
|---|---|---|
| 1. | उपदेशः-युद्धभूमौ अर्जुनाय प्रदत्तः | उपदेशः-विविधभक्तानां कृते स्वयमेव |
| 2. | अष्टादश अध्यायाः | द्वादश स्कन्धाः |
| 3. | विषयः- कर्म-ज्ञान-भक्तियोगाः | केवलं परमभक्तेः महत्त्वम् |
| 4. | संवादरूपेण कृष्णार्जुनयोर्मध्ये | आख्यानरूपेण अनेककथाभिः युक्तम् |
| 5. | जीवनमार्गः-धर्मकर्मणां फलम् | जीवनमार्गः- हरिभक्तेः अमृतत्वम् |
| 6. | कर्म-ज्ञान-भक्तिः- त्रिवेणी | श्रवण-कीर्तन-स्मरणम् भक्तिलक्षणानि |
| 7. | उपनिषदां साररूपा | वेदानां परं फलम् |
| 8. | योगशास्त्रम् | भक्तिशास्त्रम् |

षष्ठः पाठः

# डिजिभारतम्-युगपरिवर्तनम्"

**पाठपरिचयः-** "डिजिभारतम्-युगपरिवर्तनम्" भारतस्य त्वरितवर्धमानायाः डिजिटल्- क्रान्तेः प्रभावं स्पष्टयति। अस्मिन् पाठे भारतस्य शासनद्वारा आरब्धं "डिजिटल्-इंडिया-अभियानम्" कथं राष्ट्रस्य सामाजिक-आर्थिक संरचनां परिवर्तयति इति विवेचितमस्ति। पाठः दर्शयति यत् सूचनाप्रौद्योगिकी न केवलं नगरेषु, अपि तु ग्राम्य-क्षेत्रेषु अपि शिक्षा- स्वास्थ्य-वित्त-शासन-व्यापारादिषु क्षेत्रेषु प्रसृता दृश्यते । आगच्छन्तु अधुना पाठमाधृत्य दक्षताधारितप्रश्नानानाम् अपि अभ्यासं कुर्मः।

**1. कोष्ठकप्रदत्तैः समुचितपदैः रिक्तस्थानानि पूरयन्तु ।** (चयनम्)

(क) सर्वे उत्सुकतया सङ्ग्रहालये प्रदर्शितानि .................................... पश्यन्ति।

**(ऐतिहासिकानि/वस्तूनि)**

(ख) डिजिटल्-प्रक्षेपण-चलचित्रं.................................... अहं विस्मिता अभवम्।

**(दृष्ट्वा/लिखित्वा)**

(ग) अस्माकं दैनिकं जीवनं 'डिजिटल्' इत्यनेन परिवर्तितं .................................... च भवति।

**(अद्भुतम्/प्रभावितम्)**

(घ) अस्माभिः .................................... विषये अपि चिन्तनीयम्।

**(साङ्गणिकसुरक्षा/ डिजिटल्-विनिमयात्)**

(ङ) सर्वकारः अन्तर्जालस्य उत्तरोत्तरं .................................... कार्यं करोति।

**(राष्ट्राय/विस्ताराय)**

**2. भिन्न-प्रकृतिकं पदं चिह्नीकुर्वन्तु ।** (चयनम्)

(क) लभ्यते, दृश्यते, भासते, श्रूयते।

(ख) कर्तुम्, ज्ञातुम्, चिन्तनीयम्, प्रेषयितुम्।

(ग) अधुना, तावत्, शीघ्रम्, अद्भुतम्।

(घ) विकासयात्रा, सङ्ग्रहालयः, डिजिटल्-योजना, स्वास्थ्यसेवा।

(ङ) भारतस्य, शिक्षायाः, अनेकविधाः, अन्तर्जालस्य।

**3. उदाहरणम् अनुसृत्य अधोलिखितेन पदेन वाक्यनिर्माणं कुर्वन्तु। (व्याकरणम् , अनुप्रयोगः)**

**यथा - 'डिजिटल्-भारतम्' = सम्पूर्णे विश्वे 'डिजिटल्-भारतम्' इत्यस्य चर्चा श्रूयते।**

(क) साङ्गणिक-सुरक्षा - = ..........................................................................

(ख) वस्तुक्रयणार्थम् - = ..........................................................................

(ग) आधारपत्रम् - = ..........................................................................

(घ) हॉलोग्राम -द्वारा - = ..........................................................................

(ङ) डिजिटल्-योजना - = ..........................................................................

**4. अधः प्रदत्तानि वाक्यानि एकवचनात् बहुवचने परिवर्तनं कृत्वा लिखन्तु। (भाषाविस्तरः)**

**यथा-**

**अधुना अहं भारतस्य डिजिटल्-प्रगतेः विषये पठामि।**

**उत्तरम्- अधुना वयं भारतस्य डिजिटल्-प्रगतेः विषये पठामः।**

(क) अहं स्वयं 'डिजि-लॉकर' इत्यस्य उपयोगं करोमि।

**उत्तरम् -**

(ख) अत्र विविधः डिजिटल्-प्रौद्यौगिकी प्रदर्शिता अस्ति।

**उत्तरम् -**

(ग) किं त्वं कक्षां प्रति चलसि?

**उत्तरम् -**

(घ) एतत् यन्त्रं सर्वविधप्रश्नानाम् उत्तरं ददाति।

**उत्तरम् -**

(ङ) जनः लोभात् भयात् वा साङ्गणिक-अपराधेन पीडितः भवति।

**उत्तरम् -**

**5. उदाहरणमनुसृत्य विशेषण-विशेष्यपदानि मेलयन्तु । (चयनम्,भाषाविस्तरः)**

| विशेषणम् | विशेष्यम् |
|---|---|
| यथा - सम्पूर्णा | वसुधा |
| (क) प्रदर्शिताः | 1. वस्तूनि |
| (ख) उत्तमः | 2. डिजिटल्-प्रौद्योगिक्यः |
| (ग) महत्त्वाकाङ्क्षिणी | 3. विचारः |
| (घ) अग्रगण्यम् | 4. जीवनम् |
| (ङ) दैनिकम् | 5. योजना |
| (च) प्रदर्शितानि | 6. स्थानम् |

**6. अधोलिखितानि वाक्यानि पठित्वा सत्यम्/असत्यं वा लिखन्तु । (अभिज्ञानम्)**

1. नवदेहलीस्थे प्रधानमन्त्रिसङ्ग्रहालये विविधाः डिजिटल्-प्रौद्योगिक्यः प्रदर्शिताः सन्ति । (.................)
2. हॉलोग्राम्-द्वारा प्रधानमन्त्रिणः भाषणं श्रूयते दृश्यते च । (.................)
3. फास्टॅग्' इत्यस्य उपयोगेन राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य सङ्ग्रहणं न भवति। (.................)
4. वित्तीयसमावेशनस्य क्षेत्रे 'यूपीआय्, रूपे-कार्ड्, जनधनयोजना' इत्यादीनि बहूनि साधनानि सन्ति। (.................)

5. शिक्षायाः क्षेत्रे 'दीक्षा', 'स्वयम्', 'स्वयं-प्रभा', 'ई-पाठशाला' च 'भारतीय-राष्ट्रिय-डिजिटल्-पुस्तकालयः वर्तते। (.................)

6. डिजिटल्-क्रान्तौ अस्माभिः 'साङ्गणिक -सुरक्षा' विषये न चिन्तनीयम् । (.................)

**7. उदाहरणमनुसृत्य प्रत्ययान्तपदं निर्मीय वाक्यप्रयोगं कुर्वन्तु । (व्याकरणप्रयोगः, भाषाविस्तरः)**

| क्रमः | मूलधातुः | प्रत्ययः | प्रत्ययान्तपदम् | वाक्यप्रयोगः |
|---|---|---|---|---|
| **यथा-** | **दृश्** | **तुमुन्** | **द्रष्टुम्** | **दर्शकाः अमृतोद्यानं द्रष्टुं गच्छन्ति।** |
| 1 | पठ् | तुमुन् | | |
| 2 | लिख् | तुमुन् | | |
| 3 | खाद् | तुमुन् | | |
| 4 | गम् | तुमुन् | | |
| 5 | कृ | तुमुन् | | |

**8. अधोलिखितानि 'डिजीटल्-उपकरणानि' भवताम् अध्ययने कथम् उपयोगिनि भवन्ति? प्रत्येकम् उपरिपरि वाक्यद्वयं लिखन्तु । (भाषाविस्तरः तार्किकचिन्तनम्)**

| | |
|---|---|
| 1. चेट् जीपीटी- | ............................................... <br> ............................................... |
| 2. सङ्गणकम्- | ............................................... <br> ............................................... |
| 3. जङ्गमदूरवाणी- | ............................................... <br> ............................................... |
| 4. हॉलोग्राम्- | ............................................... <br> ............................................... |
| 5. डिजिटल् लॉकर्- | ............................................... <br> ............................................... |

## गतिविधिः

**प्रियच्छात्राः!** अस्माभिः 'डिजिभारतम् - युगपरिवर्तनम्'

इति पाठः पठितः । अद्यतने डिजिटल्-युगे वयं अन्तर्जाल-एप्-डिजिटल्-आदीनामुपकरणानां च उपयोगं कुर्मः। भवन्तःअद्य गृहं गत्वा एकस्य डिजिटल्-संस्कृत-एप् इत्यस्य प्रयोगविषये जानन्तु । तदनन्तरं श्वः कक्षाम् आगत्य डिजिटल्-संस्कृत-एप्- प्रयोग-विषये स्वानुभवं पञ्च वाक्येषु संस्कृतभाषायां वदन्तु

**यथा-**

1. मम नाम .............................. अस्ति।
2. अहं .............................. एप् इत्यस्य प्रयोगं कृतवान् / कृतवती।
3. .............................. एप् संस्कृतभाषायाम् उत्तरं दातुं समर्थः अस्ति।
4. एतत् .............................. एप् शीघ्रं कार्यं सम्पादयति ।
5. एतत् .............................. एप् .............................. कार्यं कर्तुं शक्नोति ।

ध्यातव्यम्- एतानि वाक्यानि केवलम् उदाहरणार्थं सन्ति। छात्राः अन्यानि वाक्यानि अपि वक्तुं शक्नुवन्ति।

## भारतीयज्ञानपरम्परा

### Apps - डिजिटल्-उपकरणाः

संस्कृते छात्रेभ्यः असङ्ख्यसंख्यासु एप्स् सन्ति। अत्र केचन एप्स-सङ्केताः उदाहरणरूपेण दीयन्ते। यदि छात्राः 'गूगल-प्ले स्टोर' इत्यत्र गत्वा 'Sanskrit' इति अन्वेषयन्ति तर्हि अनेकानि संस्कृतसम्बद्धानि एप्स तत्र प्राप्तुं शक्नुवन्ति । ततः यत् हितकारकम् उपयोगि-सुरक्षितं च भवति तस्य ग्रहणं छात्राः कर्तुं शक्नुवन्ति, अस्मिन् कार्ये छात्राः शिक्षकस्य साहाय्यं स्वीकर्तुं शक्नुवन्ति ।

1. NCERT Books
2. Shabdroopmala l Sanskrit
3. Dhaatu Roopmala l Sanskrit
4. Sanskrit - all in one
5. Hindi Sanskrit Chitrakosh
6. Sanskrit Sound Pictionary
7. Learn Sanskrit



◆◆◆

## सप्तमः पाठः
# मञ्जुलमञ्जूषा सुन्दरसुरभाषा

**पाठपरिचयः-** वयं सप्तमे पाठे संस्कृतभाषायाः विषये गीतं पठितवन्तः। अस्मिन् पाठे वयं संस्कृतस्य विशेषताः ज्ञातवन्तः । अस्माकं संस्कृतौ संस्कृतस्य स्थानं मातेव वर्तते, सा अस्मान् पोषयति। विविधानां मुनि-कवि-पौराणिक-सामान्यजनानाञ्च जीवने संस्कृतस्य महत्स्थानमस्ति। आगच्छन्तु, अधुना पाठाधृत्य दक्षताधारितप्रश्नानाम् अभ्यासं कुर्मः -

**1. अधोलिखितशब्दानां सन्धिं/सन्धिच्छेदं कृत्वा लिखन्तु ।** **(भाषाविस्तरः)**

वचनातीता = ........................

रुचिरा + अलङ्कृति = ........................

मातः + तव = ........................

संस्कृतिरेषा = ........................

**2. पाठाधारितपद्यैः अधोलिखितवाक्यानि पूरयन्तु ।** **(अभिज्ञानम्, साहचर्यम्)**

मातस्तव पोषणक्षमता .............................................. ।

पौराणिकसामान्यजनानां .............................................. ।

वैद्यव्योमशास्त्रादिविहारा .............................................. ।

गतिमतिप्रेरककाव्यविशारदे .............................................. ।

**3. संस्कृतकाव्यशास्त्रेषु के नवरसाः? पट्टिकातः चित्वा लिखन्तु ।** **(चयनम्)**

1. ....................................
2. ....................................
3. ....................................
4. ....................................

5. ....................................

6. ....................................

7. ....................................

8. ....................................

9. ....................................

| पट्टिका | मधुरः, शृङ्गारः, हास्यः, अम्लः, करूणः, रौद्रः, तिक्तः, वीरः, भयानकः, कटुः, बीभत्मः, अद्भुतः, कषायः, शान्तः |
|---|---|

**4. माता स्वापत्येषु समानरूपेण स्निह्यति, तस्याः गुणान् पट्टिकातः चित्वा लिखन्तु । (तार्किकचिन्तनम्)**

1. ............................

2. ............................

3. ............................

4. ............................

| पट्टिका | स्नहेः, दया, ईर्ष्या, करूणा, आलस्यम्, वात्सल्यः |
|---|---|

**5. कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिना अधोलिखितवाक्यानि पूरयन्तु । (भाषाविस्तरः)**

(1) सुन्दरसुरभाषा ......................... विजयते। (धरा)

(2) तव ......................... एषा। (संस्कृति)

(3) एषा जनानां ......................... आशा अस्ति। (जीवन)

(4) तव पोषणक्षमता ......................... वचनातीता। (अस्मद्)

6. पट्टिकातः अधःप्रदत्तासु रिक्तपट्टिकासु संस्कृतग्रन्थानां नामानि लिखन्तु । (साहचर्यम्)

नीतिशतकम्

.............................. **संस्कृतग्रन्थाः** ..............................

..............................

| पट्टिका | चाणक्यः, हितोपदेशः, भवभूतिः, उत्तररामचरितम्, रघुवंशम्, कालिदासः |
|---|---|

7. संस्कृतभाषायाः विशेषताः पट्टिकातः चित्वा रिक्तकोष्ठकेषु लिखन्तु ।
(चयनम्, तार्किकचिन्तनम्)

सरसविनोदा

.............................. **संस्कृतभाषा** ..............................

..............................

| पट्टिका | शास्त्ररहिता, श्रुतिसुखनिनदा, नवरससहिता, स्मृतिहितवरदा, संस्कृतिविहीना, सुन्दरसुरभाषा |
|---|---|

## गतिविधिः

### लघुनाटिका (ROLE PLAY)

"संस्कृते आजीविकावसराः' इति विषयमधिकृत्य एकां लघुनाटिकां (ROLE PLAY) प्रस्तुवन्तु।

अस्मिन् क्रमे सर्वे भागग्रहीतारः एकां पट्टिकां गृहीत्वा अग्रे आगमिष्यन्ति।

**यथा- अहं संस्कृतं पठित्वा संघलोकसेवाआयोगस्य परीक्षायां दत्त्वा अधिकारी भविष्यामि इति।**

अग्रिमः छात्र आगच्छति........।

एवं छात्राः कामपि अन्यां सेवावृत्तिं आश्रित्य कथयिष्यन्ति।

## भारतीयज्ञानपरम्परा

संस्कृतेन सम्बन्धिताः मुनयः कवयः ग्रन्थाश्च -

**मुनयः-** वेदव्यासः, वाल्मीकिः, याज्ञवल्क्यः, भरद्वाजः इत्यादयः

**कवयः-** कालिदासः, बाणभट्टः, दण्डी, माघः, भारविः इत्यादयः

**श्रुति-ग्रन्थाः-** चत्वारो वेदाः (ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः)

**पौराणिकग्रन्थाः-** अष्टादश-पुराणानि

**साहित्यग्रन्थाः-** अभिज्ञानशाकुन्तलम्, दशकुमारचरितम्, कादम्बरी, नीतिशतकम् इत्यादयः

**स्मृतिग्रन्थाः-** मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, भरद्वाजस्मृतिः इत्यादयः

**दर्शनग्रन्थाः-** तर्कसंग्रहः, ब्रह्मसूत्रम्, न्यायदर्शनम्, मीमांसादर्शनम् इत्यादयः

◆◆◆

अष्टमः पाठः

# पश्यत कोणमैशान्यं भारतस्य मनोहरम्

**पाठपरिचयः** आत्मीयाः छात्राः! अस्मिन् पाठे वयं भारतस्य ऐशान्यां दिशायां स्थितानां अष्टराज्यानां विषये पठितवन्तः। 'सप्तभगिन्यः एकः भ्राता च' इति नाम्ना प्रसिद्धानां राज्यानां नामानि, तेषां भौगोलिकं, प्राकृतिकं, सांस्कृतिकं ऐतिहासिकं च वैशिष्ट्यं वयं ज्ञातवन्तः। एतेषां राज्यानां गुणगौरवं महत्त्वं च पठितवन्तः। आगच्छन्तु कैश्चन दक्षताप्रश्नैः पठितपाठस्य अभ्यासं कुर्मः।

**1. 'सप्तभगिन्यः एकः भ्राता च' इति नाम्ना प्रसिद्धानाम् अष्टराज्यानां नामानि अधः प्रदत्तासु पट्टिकासु लिखन्तु।** (अभिज्ञानम्)

**सप्तभगिन्यः**

1. .............................................
2. .............................................
3. .............................................
4. .............................................
5. .............................................
6. .............................................
7. .............................................




रक्षासूत्रम्

**भ्राता**


1. .................

2. दिशः दश भवन्ति, तासु काश्चन अधः लिखिताः सन्ति, अवशिष्टाः दिशः तासां समुचितस्थानेषु पट्टिकातः चित्वा लिखन्तु । (साहचर्यम्)




| पट्टिका | नैर्ऋती, ईशानी, आग्नेयी, वायवी |
|---|---|

3. भारतस्य मानचित्रे अधोलिखितानि राज्यानि कस्यां दिशि स्थितानि सन्ति, उदाहरणानुसारं पट्टिकातः चित्वा लिखन्तु । (साहचर्यम्)




**यथा –**

| | | | |
|---|---|---|---|
| | **हिमाचलप्रदेशः** | **=** | **उत्तरस्याम्** |
| (क) | अरूणाचलप्रदेशः | = | ........................ |
| (ख) | गुजरातः | = | ........................ |
| (ग) | तमिलनाडुः | = | ........................ |
| (घ) | उत्कलः | = | ........................ |
| (ङ) | सिक्किमः | = | ........................ |

| पट्टिका | पूर्वस्याम्, ऐशान्याम्, दक्षिणस्याम्, पश्चिमायाम्, ऐशान्याम् |
|---|---|


**4.** **'सप्तभगिन्यः एकः भ्राता च' इति प्रतीकेन प्रसिद्धानि अष्टराज्यानि भारतवृक्षे पुष्पस्तबकसदृशानि विराजन्ते। अधः प्रदत्ते पुष्पस्तबके अवशिष्टानां पुष्पाणां (राज्यानां) नामानि सङ्केतानुसारं लिखन्तु ।** **(साहचर्यम्)**



**5. अधोलिखितानि राज्यानि तेषां राजधानीभिः सह मेलयन्तु ।** (चयनम्, साहचर्यम्)

| राज्यम् | | राजधानी | |
|---|---|---|---|
| (1) | सिक्किमः | (1) | शिलाङ्गम् |
| (2) | अरुणाचलप्रदेशः | (2) | इम्फालः |
| (3) | असमः | (3) | अगरतला |
| (4) | मणिपुरम् | (4) | गङ्गटोकः |
| (5) | मिजोरमः | (5) | कोहिमा |
| (6) | मेघालयः | (6) | ईटानगरम् |
| (7) | नागालैण्डम् | (7) | आइजोलः |
| (8) | त्रिपुरा | (8) | दिसपुरम् |

**6. अधः प्रदत्ते भारतस्य मानचित्रे अङ्किताः बिन्दवः कानि राज्यानि सूचयन्ति, ज्ञात्वा लिखन्ति ।** (अन्वेषणम्)



## 7. शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य च समक्षं 'न' इति लिखन्तु । (अभिज्ञानम्)

(1) अस्माकं देशे अष्टाविंशतिः राज्यानि सन्ति । ☐

(2) अस्माकं देशे सप्त केन्द्रशासितप्रदेशाः सन्ति । ☐

(3) पूर्वोत्तरस्य अष्टराज्यानि प्रायः स्वाधीनानि एव दृष्टानि । ☐

(4) सप्तभगिनीसंज्ञकानि राज्यानि पर्वत-वृक्ष-पुष्प-प्रभृतिभिः प्राकृतिकसम्पद्भिः सुसमृद्धानि सन्ति । ☐

(5) एतत्प्रादेशिकाः जनाः शरीरेण ऊर्जस्विनः भवन्ति । ☐

(6) अरुणाचलप्रदेशे हस्तशिल्पानां बाहुल्यं वर्तते । ☐

## 8. पट्टिकातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयन्तु । (व्याकरणप्रयोगः)

(1) एतद् अतिरिच्य अष्ट केन्द्रशासितप्रदेशाः .............. सन्ति ।

(2) अष्टराज्यानां एकः समवायोऽस्ति यः सप्तभगिन्यः एकः भ्राता .......... इति नाम्ना प्रथितः अस्ति।

(3) इमानि राज्यानि प्राचीनेतिहासे प्रायः स्वाधीनानि .................. दृष्टानि ।

(4) गारो-खासी-नागा-मिजो-लेप्चा-प्रभृतयः बहवः जनजातयः .............. निवसन्ति ।

(5) एतानि राज्यानि ............. भ्रमणार्थं स्वर्गसदृशानि सन्ति ।

| पट्टिका | तु | एव | अपि | च | अत्र |
|---|---|---|---|---|---|

9. भारतस्य ऐशान्यां दिशायां स्थितानि राज्यानि उदाहरणानुसारं तेषां विशेषताभिः सह मेलयन्तु। (अभिज्ञानं चयनं च)

प्राकृतिकसमृद्धिभिः सुसमृद्धानि

हस्तशिल्पानां बाहुल्यम्


जनजातिरहितप्रदेशाः

जनजातिबहुलप्रदेशः

ऊर्जस्विनः प्रादेशिकाः

प्रायः स्वाधीनानि

हस्तशिल्पानां बाहुल्यम्



## गतिविधिः

### रक्षाबन्धनम्

छात्राः कक्षायां एकं गतिविधिं करिष्यन्ति । पाठे पठितः अयं श्लोकः हरितपट्टे लिखितः भवति ।

**अद्वयं मत्रयं चैव न–त्रि–युक्तं तथाद्वयम् ।**
**सप्तराज्यसमूहोऽयं भगिनीसप्तकं भवति ॥**

**तेन युक्तो लघुः भ्राता सिक्किमः इति विश्रुतः ।**
**पश्यतकोणमैशान्यं भारतस्य मनोहरम् ॥**

एकः छात्रः सिक्किमराज्यस्य भूमिकाम् अर्थात् भ्रातुः भूमिकां निर्वहति । सः कक्षायाम् अग्रे आगत्य हरितपट्टात् विमुखः उपविशति । अन्ये सप्त छात्राः अन्येषां सप्तराज्यानां अर्थात् सप्तभगिनीनां भूमिकां निर्वहन्ति । प्रत्येकं छात्राय एकस्य राज्यस्य नाम दीयते । किन्तु छात्राः क्रमेण न उपविशन्ति । भ्रातुः भूमिकायां स्थितः छात्रः राज्यानां क्रमे एकाम् एकां भगिनीं नाम्ना अग्रे आह्वयति । आहूता भगिनी अग्रे गत्वा रक्षासूत्रबन्धनस्य अभिनयं करोति । भ्रातुः भूमिकायां छात्रः उपहारप्रदानस्य अभिनयं करोति । एवमेव सर्वे छात्राः भगिनीनाम् अभिनयं कुर्वन्ति । अनन्तरम् इतरैः छात्रैः समानः गतिविधिः क्रियते । यः छात्रः सर्वेषां राज्यानां नाम क्रमशः आह्वयति, सः उत्तमो भ्राता भवति ।

## भारतीयज्ञानपरम्परा

भारतस्य उत्तरपूर्वस्यां दिशायां स्थितानि राज्यानि सांस्कृतिकरूपेण सुसमृद्धानि सन्ति । एतेषु राज्येषु आयोजिताः प्रमुखोत्सवाः एतत्प्रादेशिकानां च पारम्परिकाः वेशभूषाः महत्वैशिष्ट्ययुताः वर्तन्ते । एषु प्रदेशेषु आयोजितानां प्रमुखोत्सवानां पारम्परिकवेशभूषाणां च सूची अधःप्रदत्तायां तालिकायां प्रदर्शिता वर्तते ।

| क्र. सं. | राज्यम् | प्रमुखोत्सवाः | पारम्परिकनृत्यानि | पारम्परिकवेशभूषाः |
|---|---|---|---|---|
| 1. | अरुणाचलप्रदेशः | लोसार, मोपिन, म्योको | पोपिर नृत्य, अजी ल्हामू | शाल, अङ्गवस्त्रम् |
| 2. | असमः | बिहू, अंबुबाची मेला, जोनबिल मेला | बिहू | मेखला चादर, गमूचा |
| 3. | मणिपुरम् | संगाई, कांग चिंगबा, | मणिपुरी | फैनेक, इन्नाफी, पोटलोई, खमेन चत्पा |
| 4. | मेघालयः | वांगला, चेरी बलोसम | नोंग्क्रेम | जैनसेम, दमकण्डा, जिम्फोंग |
| 5. | मिजोरमः | चापचार कुट, पावल कुट, मीम कुट | चेराव | पुआन, पुआनचेई, लौस |
| 6. | नागालैण्डम् | होर्नबिलमहोत्सवः, लुई–नगाई–नी | शाकैः समबद्धं पारम्परिकनृत्यम् | हंगामी |
| 7. | त्रिपुरा | गरिया पूजा, खर्ची पूजा, अशोकाष्टमी, बीजू महोत्सवः | चेराव | रिकुतु गमची |
| 8. | सिक्किमः | सागा दावा, पांग ल्हाबसोल | शाकैः समबद्धं पारम्परिकनृत्यम् | बखू, लेप्चा, डम्परा, दुम्बुन |

◆◆◆

## नवमः पाठः
# कोऽरुक्? कोऽरुक्? कोऽरुक्?

**पाठपरिचयः-** प्रियाः छात्राः! आहारसंयमः, नियमितं व्यायामं स्वस्था दिनचर्या च इमे उत्तमस्वास्थ्यस्य आधाराः भवन्ति। स्वास्थ्यविषयकं ज्ञानं वयं आयुर्वेदविषयके ग्रन्थे प्राचीनकालादेव प्राप्नुमः। भवतां पठितेऽपि 'कोऽरुक्.....' इति पाठे भोजनकाले ध्यातव्यविषयोपरि वर्णनं कृतमस्ति। पाठस्य पठनान्तरं भवन्तः ऋतोः अनुकूलं शरीराय हितकरस्य भोजनस्य विषये ज्ञातवन्तः। आगच्छन्तु, अधुना वयं केषाञ्चन दक्षताधारितप्रश्नानाम् अभ्यासं कुर्मः।

**1. विशेष्यविशेषणपदानां मेलनं कुर्वन्तु । (साहचर्यम्)**

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| (i) विशाले | (क) शुकः |
| (ii) सर्वासु | (ख) उत्तराणि |
| (iii) मनोहरः | (ग) विकाराणाम् |
| (iv) त्रीणि | (घ) दिक्षु |
| (v) अजातानाम् | (ङ) प्राङ्गणे |

**2. पट्टिकातः समुचितपदानि चित्वा समक्षं लिखन्तु । (चयनम्)**

(i) प्रातः उत्थाय ..................................।

(ii) प्रतिदिनं ..................................।

(iii) यदा क्षुधायाः अनुभूतिः भवति तदैव ..................................।

(iv) यादृशः आहारः शरीराय अनुकूलः, तादृशः एव ..................................।

(v) स्वास्थ्यं सर्वोत्तमं ..................................।

| पट्टिका | भोक्तव्यः, भोजनं कर्त्तव्यम्, व्यायामः करणीयः, दन्तानां स्वच्छता करणीया, धनम् अस्ति |
|---|---|

**3. उदाहरणानुसारम् अनेकपदानां स्थाने पदमेकं लिखन्तु । (भाषाविस्तर:)**

**यथा- पातुम् इच्छा -पिपासा**

(i) ज्ञातुम् इच्छा ..............................

(ii) भोक्तुम् इच्छा ..............................

(iii) पठितुम् इच्छा ..............................

(iv) गन्तुम् इच्छा ..............................

(v) जीवितुम् इच्छा ..............................

(vi) मोक्षस्य इच्छा ..............................

| पट्टिका | मुमूक्षा, जिजीविषा, पिपठिषा, बुभुक्षा, जिगमिषा, जिज्ञासा |
|---|---|

**4. उदारणानुसारं वाक्यरचनां कुर्वन्तु । (भाषा विस्तर:)**

**यथा-शुक: वैद्यस्य कुटीरसमीपं गतवान्।**

शुक: वैद्यस्य कुटीरसमीपं अगच्छत् ।

(i) शुक: 'कोऽरुक्'इति प्रश्नं कृतवान् ।

..................................................

(ii) बालक: फलानि खादितवान्।

..................................................

(iii) वाग्भट: उत्तरं दत्तवान्।

..................................................

(iv) शिष्य: महर्षिचरकस्य नाम श्रुतवान्।

..................................................

(V) छात्र: आहारविषये ज्ञातवान्।

..................................................

5. **उदारणानुसारं वाक्यरचनां कुर्वन्तु ।** (व्याकरणप्रयोग:, भाषाविस्तर:)

**यथा -**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | अहं ज्ञातवान्। | आवां ज्ञातवन्तौ। | वयं ज्ञातवन्त:। |
| (i) | स: फलं खादितवान्। | ...................... | ...................... |
| (ii) | त्वं प्रश्नं पृष्ट्वान्। | ...................... | ...................... |
| (iii) | छात्र: पाठं पठितवान्-। | ...................... | ...................... |
| (iv) | शुक: कुटीरसमीपं गतवान् | ...................... | ...................... |
| (v) | श्रमिक: कार्यं कृतवान्। | ...................... | ...................... |

6. **अधोलिखितवाक्यानि पठित्वा सम्यक् विचार्य 'आम्' 'न' वा लिखन्तु ।** (तार्किकचिन्तनम्)

(i) रुग्ण: राघव: किलोपरिमितं फलं खादितवान्। स: अद्यैव स्वस्थ: भविष्यति। (....................)

(ii) लता कृशकाया अस्ति।सा अत्यधिकमात्रया भोजनं स्वीकृत्य स्थूला भविष्यति। (....................)

(iii) गरिष्ठद्रव्याणि अपि अल्पमात्रया सेवनेन सुपाच्यानि भवन्ति। (....................)

(iv) क्षुधाया: अनुभूति: भवतु न वा, भोजनं तु कर्त्तव्यमेव। (....................)

(v) स्वास्थ्यरक्षणाय केवलं भोजनस्य महत्त्वं भवति,कस्यापि अन्यघटकस्य न। (....................)

7. **यथोचितं मेलयन्तु ।** (अभिज्ञानम्)

| | क | | ख |
|---|---|---|---|
| (i) | ऋतव: | (क) | निरामया: सन्तु |
| (ii) | सर्वे | (ख) | स्वच्छजलेन भवेत् |
| (iii) | सुस्नानम् | (ग) | प्रतिदिनं कुर्यात् |
| (iv) | दन्तविशोधनम् | (घ) | षट् सन्ति |
| (v) | भोजनम् | (ङ) | बुभुक्षायां भवेत् |

## गतिविधि:

एकस्मिन् कण्डोले फलानां, शाकानाम् अन्येषाञ्च भोज्यपदार्थानां चित्राणि सन्ति। छात्रा: तानि चित्राणि कण्डोलद्वये स्थापयिष्यन्ति। एकस्य कण्डोलस्योपरि **'सन्तुलित: आहार:'**, अपरस्य चोपरि **'असन्तुलित: आहार:'** अपि छात्रै: एव लेखनीयम्।



**'सन्तुलित: आहार:'**



**'असन्तुलित: आहार:'**

### अपेक्षितानि चित्राणि

सेवफलम्, दुग्धम्, 'पिज्जा' इति, पर्युषितम् अन्नम्, हरितशाकम्, कदलीफलम्, द्विदलम्, शीतलपेयम्, फलरसम्, अङ्कुरितान्नम्, 'बर्गर' इति

## भारतीयज्ञानपरम्परा

आयु: सत्त्वबलारोग्यसुखप्रीतिविवर्धना:।
रस्या: स्निग्धा: स्थिरा हृद्या आहारा सात्त्विकप्रिया: ॥ (भगवद्गीता 17.8)

मितं च खादेत् स्वस्थ्यं मितं सुप्त्वा मितं वदेत् । (मनुस्मृति: 2.57)

'कालभोजनं आरोग्यकरं भवति नान्यथा।' (चरकसंहिता- सूत्रस्थानम् 5.13)

'अजीर्णे भोजनं विषम्।' (चरकसंहिता- सूत्रस्थानम् 5.70)

'यथा भोजनमाद्यं तु तथा धर्म: प्रसीदति।' (हितोपदेश:)

## दशमः पाठः/एकादशः पाठः
# "सन्निमित्ते वरं त्यागः"

**पाठपरिचयः-** अस्मिन् पाठे वीरवरः नाम सच्चरित्रः निष्ठावान् च पुरुषः शृङ्गारपुरे राजद्वारे सेवकः आसीत्। सः स्वकर्तव्ये निष्ठावान्, सत्यपरायणः, त्यागशीलश्च आसीत्। राज्ञः मन्त्रिणः, राजमहिषी च तस्य गुणैः अतीव प्रभाविताः। अन्ते राजा तस्य निष्ठां वीरतां च दृष्ट्वा तं सम्मानयति। अयं पाठः सत्यनिष्ठायाः, कर्त्तव्यपालनस्य, त्यागस्य च महत्त्वं प्रदर्शयति। "यदा महद्ध्येयः पुरतः तिष्ठति तदा स्वार्थत्यागः एव धर्मः।" "कर्त्तव्यस्य जयः एव सत्यधर्मः।"

आगच्छन्तु कर्तव्यनिष्ठाः छात्राः वयम् इदानीं दक्षताधारितप्रश्नानाम् अभ्यासं कुर्मः।

**1. स्वकीयं सुखं सुविधाञ्च त्यक्त्वा कः कं रक्षति ? समुचितं मेलनं कुर्वन्तु ।** **(साहचर्यम्)**

| | | | |
|---|---|---|---|
| (क) | सैनिकः | (1) | स्वास्थ्यम् |
| (ख) | शिक्षकः | (2) | देशम् |
| (ग) | चिकित्सकः | (3) | अध्ययनम् |
| (घ) | छात्रः | (4) | व्यवसायम् |
| (ङ) | व्यवसायी | (5) | शिक्षाम् |

**2. अधोलिखितानि वाक्यानि पठित्वा आम् / न वा लिखन्तु ।** **(तार्किकचिन्तनम्)**

(क) 'त्यागः' एकं मानवीयं मूल्यम् अस्ति। [..................]

(ख) परेषाम् उपकारः (परोपकारः) भवति। [..................]

(ग) लोभी जनः अपि त्यागं कर्तुं शक्नोति वा ? [..................]

(घ) परोपकाराय वयं स्वकीयं सुखं, समयं, वस्तु, धनञ्च त्यक्तुं शक्नुमः। [..................]

(ङ) किं भवन्तोऽपि स्वजीवने कस्यापि सहायतायै परोपकाराय वा त्यागं कृतवन्तः ? [..................]

3. अधः दत्ते वर्णजाले पात्राणां नामानि उदाहरणानुसारं चिह्नीकृत्य लिखन्तु । (अन्वेषणम्)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| रा | जा | ग | रा | रे | अ | च | तृ | प्तिः | का |
| ज | पि | फ | मु | वी | र | व | ती | वि | झ |
| ल | र | त | के | र | अ | म्मू | यु | भ | ड |
| क्ष्मीः | ज | नी | श | व | लृ | न | ढ | ज | उ |
| रे | श | क्ति | ध | रः | ऋ | स | न्या | मू | र्तिः |
| खा | प | ज्ञ | ग | छ | तुः | म | न्दी | श्री | वि |
| ध | स | त | ब | जा | का | न्त्री | ध | प | ष्णुः |
| न | न्त | दे | रा | बी | न | लि | झ | रे | खा |
| मि | ला | वी | म | हु | ता | न | यो | श्री | न्द्रः |
| स्सू | दी | पि | का | क्ष | ल | द्म | सु | म | न |

यथा- राजा

(1) ............................

(2) ............................

(3) ............................

(4) ............................

**4. पाठानुसारं समुचितं मेलनं कुर्वन्तु ।** **(साहचर्यम्)**

| ‘क’ स्तम्भः | | ‘ख’ स्तम्भः | |
|---|---|---|---|
| (क) | धनानि जीवितं चैव | (1) | विनाशे नियते सति |
| (ख) | जायन्ते म्रियन्ते च | (2) | न भूतो न भविष्यति |
| (ग) | सन्निमित्ते वरं त्यागो | (3) | मादृशाः क्षुद्रजन्तवः |
| (घ) | अनेन सदृशो लोके | (4) | परार्थे प्राज्ञः उत्सृजेत् |

**5. यथानिर्देशम् उत्तरन्तु ।** **(भाषाविस्तरः)**

(क) **‘धनानि‘** इति पदस्य लिङ्गं लिखन्तु ।

**(पुल्लिङ्गः / नपुंसकलिङ्गम् / स्त्रीलिङ्गम्)** ........................................।

(ख) **‘जीवनम्‘** इति पदस्य विपर्ययपदं लिखन्तु ।

**(शरणम् / मरणम् / तरणम्)** ........................................।

(ग) **‘त्यागः’** इति पदस्य पर्यायपदं किम् ?

**(उत्सर्जनम् / ग्रहणम् / लोभः)** ........................................।

(घ) **’उत्सृजेत्’** इति पदे कः लकारः ? **( लट्/ विधिलिङ्/ लृट्)** ........................................।

(ङ) **‘प्रतिवसति’** इत्यत्र उपसर्गः कः? **( वस्/ प्रति/तिप् )** ........................................।

**6. पट्टिकातः पदानि चित्वा रिक्तस्थानपूर्तिं कुर्वन्तु ।** **(अभिज्ञानात्मकम् )**

(क) राजा ..................................... प्रति स्नेहवान् आसीत्।

(ख) जायन्ते च ..................................... च मादृशाः क्षुद्रजन्तवः ।

(ग) न भूतो न ..................................... ।

(घ) धनानि ..................................... चैव परार्थे प्राज्ञ उत्सृजेत्।

(ङ) सन्निमित्ते वरं ..................................... ।

| पट्टिका | त्यागः, जीवनम्, प्रजाः, भविष्यति, म्रियन्ते |
|---|---|

7. भवान् कदापि मित्र-साहाय्येन लाभं प्राप्तवान् ? तस्य वृत्तान्तं स्वभाषया लिखन्तु ।
(तार्किक- चिन्तनम्)

.................................................................................................................................

.................................................................................................................................

.................................................................................................................................

.................................................................................................................................

.................................................................................................................................

.................................................................................................................................

.................................................................................................................................

.................................................................................................................................

## गतिविधिः

**(क) सुभाषितलेखनम्-**

त्यागपरोपकारयोः महत्त्वविषयकानां श्लोकानां सुभाषितानां संग्रहणं तेषां पट्टिकानिर्माणं कक्षायां भित्तिकोपरि स्थापनम्।

**यथा- "सन्निमित्ते वरं त्यागः"**

**"सन्निमित्ते वरं त्यागः"**

**"कर्त्तव्यस्य जयः एव सत्यधर्मः।"**

**"यदा महद्ध्येयः पुरतः तिष्ठति तदा स्वार्थत्यागः एव धर्मः।"**

अन्यानि सम्बन्धितसुभाषितानि इतोऽपि भवितुम् अर्हन्ति ।

**(ख) प्रश्नोत्तरचर्चा-**

भवान् / भवती कर्त्तव्यनिष्ठाविषयिकीं कामपि कथां स्वभाषया लिखन्तु, चित्र-संश्लेषणं च कुर्वन्तु।

## भारतीयज्ञानपरम्परा

### हितोपदेशः

**परिचयः –** अस्य ग्रन्थस्य रचयिता नारायणपण्डितः अस्ति । अस्य चत्वारः विभागाः – मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः च।

**सारांशः –** अत्र नीतिकथाः जीवजन्तुपात्राणां माध्यमेन प्रदत्ताः, ये मानवजीवने सत्यं, धर्मं, मैत्रीं, धैर्यादीनि मूल्यानि शिक्षयन्ति।

### पञ्चतन्त्रम्

**परिचयः –** अस्य ग्रन्थस्य रचयिता विष्णुशर्मा अस्ति । अस्मिन् पञ्च तन्त्राणि सन्ति – मित्रभेदः, मित्रसम्प्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं च। अत्र उपाख्यानानि जीवजन्तुभिः कथितानि, येषु नीतिः, मैत्री, चातुर्यम्, साहसशिक्षा इत्यादीनि जीवनमूल्यानि  दृश्यन्ते।

◆◆◆

## द्वादशः पाठः
# सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते

**पाठपरिचयः-** अये मधुरभाषिणः प्रियच्छात्राः! अस्मिन् पाठे भवन्तः पठितवन्तः यत् शब्दानां सम्यग्ज्ञानार्थं व्याकरणं पठितव्यम्। अस्माभिः अत्र वर्णोच्चारणप्रकारः, उचितवर्णप्रयोगलाभाः,पाठकस्य गुणाः दोषाः च पठिताः। आगच्छन्तु, अधुना दक्षताधारितप्रश्नानाम् अभ्यासं कुर्मः।

**1. अधःप्रदत्तपदैः सह समानार्थकानि पदानि योजयन्तु।** (साहचर्यम्)

| स्तम्भः 'क' | | स्तम्भः 'ख' | |
|---|---|---|---|
| (क) | स्वजनः | (1) | सर्वम् |
| (ख) | श्वजनः | (2) | बन्धुः |
| (ग) | सकलम् | (3) | विष्ठा |
| (घ) | शकलम् | (4) | एकबारम् |
| (ङ) | सकृत् | (5) | खण्डम् |
| (च) | शकृत् | (6) | कुक्कुरः |

**2. अधोलिखितपंक्तिभ्यः अव्ययपदानि चित्वा लिखन्तु।** (व्याकरणप्रयोगः)

(क) यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।
..........................................................................

(ख) व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
..........................................................................

(ग) एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
..........................................................................

(घ) सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।
..........................................................................

(ङ) अधुना छात्राः कथां श्रोतुम् इच्छन्ति।
..........................................................................

3. उदाहरणानुसारं प्रदत्तानां 'नञ्'तत्पुरूषसमासस्य विग्रहाणां समस्तपदं लिखन्तु ।
(व्याकरणप्रयोगः, भाषाविस्तरः)

| विग्रहपदम् | | समस्तपदम् | |
|---|---|---|---|
| **यथा-** | **न अर्थज्ञः-** | **अनर्थज्ञः** | |
| | **न व्यक्तः-** | **अव्यक्तः** | |
| (क) | न शान्तिः - | (1) | ............................................ |
| (ख) | न क्षरः - | (2) | ............................................ |
| (ग) | न अश्वः - | (3) | ............................................ |
| (घ) | न एकता- | (4) | ............................................ |
| (ङ) | न सुरः - | (5) | ............................................ |

4. रेखांकितपदस्य स्थाने प्रश्नवाचकशब्दस्य प्रयोगं कृत्वा प्रश्ननिर्माणं कुर्वन्तु । (तार्किकचिन्तनम्)

(क) <u>व्याघ्री</u> दंष्ट्राभ्यां पुत्रान् हरेत्।

(ख) <u>पाठकस्य</u> षड्गुणाः सन्ति।

(ग) <u>जनः</u> सस्वरम् इव पठति।

(घ) <u>पठनकाले</u> एतान् दोषान् परिष्कृत्य पठामः।

(ङ) <u>उच्चारणदोषेण</u> अर्थः परिवर्तितः भवति।

## 5. पट्टिकातः पदानि चित्वा रिक्तस्थानानि पूरयन्तु । (चयनम्)

(1) .......................... स्वशिशुं स्वदन्तैः गृहीत्वा एकस्थानतः अपरस्थानकं नयति। तस्या : दन्ताः अतीव (2) .......................... भवन्ति । अतः सा स्वशिशुं तथा न (3) .......................... येन शिशुः क्षतः भवेत्। एवमेव तथा न गृह्णाति येन शिशुः दन्तेभ्यः पतेत् । वर्णानाम् उच्चारणम् अपि तथैव (4) .......................... । (5) .......................... अतिकठोररूपेण (6) .......................... वा न कर्त्तव्यम् । (7) .......................... उच्चारणसमये इदम् अवधेयं यत् वर्णाः स्पष्टतया (8) .......................... च उच्चारणीयाः। एतेन श्रोता वक्तुः भावान् (9) .......................... अवगच्छन्ति (10) .......................... पुरुषः समाजे सम्मानं प्राप्नोति ।

| पट्टिका | तीक्ष्णाः, गृह्णाति, उच्चारणशीलः, स्वाभाविकरूपेण, व्याघ्री, वर्णानाम्, अतिशैथिल्येन, कर्त्तव्यम्, सम्यक्तया, वर्णोच्चारणम् |
|---|---|

## 6. शब्दे मात्राम् अक्षरं वा परिवर्त्य सार्थकं शब्दं निर्मान्तु । (भाषा विस्तरः)

| | | | |
|---|---|---|---|
| **यथा-** | **गरिष्ठा** | **-** | **वरिष्ठा** |
| | उक्तिः | - | |
| | प्रचारः | - | |
| | युतिः | - | |
| | कर्म | - | |
| | भर्ता | - | |
| | धर्ता | - | |
| | हरितः | - | |

## गतिविधिः

शिक्षकः छात्रान् पाणिनिः, पतञ्जलिः, कात्यायनः, यास्कः चेति गणेषु विभज्य श्यामपट्टे शब्दं लिखति। क्रमेण प्रतिवर्गात् एकः छात्रः शब्दस्य उच्चारणं करोति। शुद्धोच्चारणाय तस्मै वर्गाय अङ्कः दीयते।

एवमेव क्रीडायाः आयोजनं भविष्यति। अन्ते यः गणः जयति तस्मै गणाय करतलध्वनिना जयघोषः करणीयः।

## भारतीयज्ञानपरम्परा

| वेदः | प्रमुखाः शिक्षा-ग्रन्थाः |
|---|---|
| ऋग्वेदः | पाणिनीयशिक्षा |
| यजुर्वेदः | याज्ञवल्क्यशिक्षा,माध्यन्दिनशिक्षा,भारद्वाजशिक्षा |
| सामवेदः | नारदीय-शिक्षा |
| अथर्ववेदः | माण्डुकीशिक्षा |

## त्रयोदशः पाठः
# वर्णोच्चारण-शिक्षा १

**पाठपरिचयः-** आत्मीयाः छात्राः! अस्मिन् पाठे वयं वर्णानाम् उच्चारणे आरम्भात् ध्वन्युच्चारणपर्यन्तं वायोः सञ्चरणं केषु अङ्गेषु भवति' इति सम्यक्तया पठितवन्तः। वयं ज्ञातवन्तः यत् वर्णानाम् उच्चारणे शरीरस्य विविधानाम् अङ्गानां सम्मिलितिः भवति । आगच्छन्तु कैश्चन दक्षताप्रश्नैः पठितपाठस्य अभ्यासं कुर्मः ।

**1. वर्णानाम् उच्चारणे वायोः सञ्चरणं शरीरस्य केषु अङ्गेषु क्रमेण भवति, ऊर्ध्वक्रमे लिखन्तु ।**
**(अभिज्ञानं साहचर्यं च)**


(4) .................................

(3) .................................

(2) .................................


(1) नाभिप्रदेशः

2. चित्रे बिन्दुभिः दर्शितानि उच्चारणस्थानानि पट्टिकातः चित्वा लिखन्तु । (साहचर्यम्)



| पट्टिका | नाभिः, श्वासकोशः, श्वास-नालः, कण्ठ-बिलः, जिह्वा, मुखम्, नासिका |
|---|---|

3. चित्रे बिन्दुभिः दर्शितानाम् उच्चारणस्थानानां नामानि पट्टिकातः चित्वा लिखन्तु । (साहचर्यम्)



| पट्टिका | तालुः, नासिका, मूर्धा, दन्तः, ओष्ठौ, कण्ठः |
|---|---|

**4. पाठानुसारं रिक्तस्थानानि पूरयन्तु ।** **(चयनम् अभिज्ञानं च)**

**क)** उरः पुनः श्वासकोश-स्थितं ................ ऊर्ध्वं निःसारयति ।

**ख)** वर्णस्य उच्चारणसमये वायुः मुखे नासिकायां वा यस्मिन् स्थले वर्णरूपेण प्रकटीभवति, तत् ................ इति उच्यते ।

**ग)** वर्णस्य उच्चारणसमये आस्यस्य यः भागः स्थानं स्पृशति समीपं वा याति, सः भागः ................ इति उच्यते ।

**घ)** तालु, मूर्धा दन्तः च एतेषु त्रिषु स्थानेषु ................ करणं भवति ।

**ङ)** कण्ठ्यानाम्, ओष्ठ्यानां ................ च वर्णानाम् उच्चारणे जिह्वा प्रायः निष्क्रिया भवति ।

**5. वर्णान् तेषाम् उच्चारणस्थानैः सह मेलयन्तु ।** **(साहचर्यम्)**

| **वर्णाः** | **स्थानम्** |
|---|---|
| तालव्याः | कण्ठः |
| कण्ठ्याः | ओष्ठः |
| ओष्ठ्याः | नासिका |
| नासिक्याः | तालुः |

**6. वर्णाणां समक्षं तेषाम् उच्चारणस्थानानि पट्टिकातः चित्वा लिखन्तु ।** **(अवबोधः साहचर्यं च)**

| **वर्णानि** | | **उच्चारणस्थानानि** |
|---|---|---|
| अ, कवर्गः, ह् | = | .......................... |
| इ, चवर्गः, य्, श् | = | .......................... |
| ऋ, टवर्गः, र्, ष् | = | .......................... |
| ऌ, तवर्गः, ल्, स् | = | .......................... |
| उ, पवर्गः | = | .......................... |

| **पट्टिका** | कण्ठः, मूर्धा, तालुः, दन्त्यः, ओष्ठौ |
|---|---|

7. **उचितकथनस्य समक्षं 'आम्' अनुचितकथनस्य समक्षं 'न' इति लिखन्तु । (अभिज्ञानम्)**

**क)** शब्दं वर्णं वा उच्चारयितुं सर्वप्रथमं नाभिप्रदेशे स्थिताः मांसपेश्यः उरः नोदयन्ति ।

**ख)** कण्ठबिलात् वायुः उर्ध्वं सरन् आस्यं प्रविशति ।

**ग)** आस्ये दश उच्चारणस्थानानि भवन्ति ।

**घ)** मुरलीं वादयन्तः 'अङ्गुल्यः' आस्यस्य करणानि इव व्यवहरन्ति ।

## गतिविधिः

### रेलयानम्

वर्णानाम् उच्चारणस्थानानि सम्यकप्रकारेण ज्ञातुं छात्रैः एकः गतिविधिः कारयितुं शक्यते । कक्षायाः षट् छात्राः स्फोरकपत्रेषु स्थूलाक्षरैः षण्णाम् उच्चारणस्थानानां नामानि विलिख्य प्रकोष्ठे षट्सु स्थानेषु रेलस्थानकरूपेण तिष्ठन्ति । अन्ये छात्राः परस्परं संयुज्य रेलयानस्य निर्माणं कुर्वन्ति। रेलयानस्य कक्षेषु सर्वे स्वरवर्णाः व्यञ्जनवर्णाश्च पृथक् रूपेण लघुपत्रेषु विलिख्य स्थापिताः भवन्ति। एकः छात्रः रेलयानं हरितध्वजं दर्शयति । रेलयानं चलति सर्वेषु च स्थानकेषु तिष्ठति । यस्य उच्चारणस्थानस्य नाम्ना स्थानकं भवति, तदुच्चारणस्थानीयाः वर्णाः तस्मिन् स्थानके स्थाप्यन्ते । छात्राणां संख्यादृष्ट्या एकाधिकानां रेलयानानां निर्माणं कर्तुं शक्यते । केषाञ्चन वर्णानाम् तेषां स्थानकेषु स्थापनम् केषाञ्चन च आरोहणं परिकल्प्य रोचकतां योजयितुं शक्यते ।

## भारतीयज्ञानपरम्परा

वर्णानाम् उच्चारणविषये पाणिनीयशिक्षायां निगदिताः श्लोकाः अवश्यं ध्यातव्याः –

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्तश्च नासिकोष्ठौ च तालु च ।।

कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥

जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो व स्मृतो बुधैः ।
ए-ऐ तु कण्ठतालव्या ओ-औ कण्ठोष्ठजौ समृतौ ॥

# टिप्पणी

# टिप्पणी

# टिप्पणी

SCERT
स्वाध्यायान्मा प्रमदः

राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्

वरुण मार्ग, डिफेन्स कॉलोनी, नई दिल्ली-110024

# दीपिका

## अष्टमकक्षायै
## संस्कृत-अभ्यासपुस्तिका

8




राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् दिल्ली
DELHI
SCERT
स्वाध्यायान्मा प्रमदः

राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्
वरुण मार्ग, डिफेन्स कॉलोनी, नई दिल्ली-110024